This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-2674

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
आनंदलहरी	~~नृसिंह~~ [illegible]	धार्मिक	पूर्ण	नृसिंह	3/6	107	संस्कृत	कागद	10	25		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनंद लहरी - शंकराचार्यांची

श्रीगणेशायनमः॥ बारंबारमुदारसस्मितमुखः शिक्यो परिस्था
पितं हारं हारमुद्दूखलो परिगतो हय्यंगवीनं हरात्॥ आयं
तीं पुरतो विलोक्य जननीमादाय यष्टिं करे धावं धावमभिद्रु
प्रकाशितभयः पायात्स मायार्भकः॥१॥ कह्लारोमल कै
रवांबुजदलन्मान्समजरीः कोदंडं करपंकजेन दधती पुंडे
क्षुदंडोद्भवं॥ सौवर्णांकुशपाशपाणिमरुणामारक्त व
स्त्रावृतामाताम्रांबुजराजितां त्रिनयनां चेंदार्धचूडां भ
जे॥२॥ प्रणम्य शंकराचार्यचरणांबुजरुह द्वयं॥ आनंद
क हरिस्तोत्रं विष्णुपक्षे पिलक्ष्यते॥३॥ श्लोकः॥ शिवः शक्त्या
आ युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लस्यं हदितुमपि॥ अतस्त्वामाराध्यां हरिहरविरिंच्यादिभिर
प्रणंतुं स्तोतुं वा कथमकृतपुण्यः प्रभवति॥१॥ तत्र भवानी
क्षे। ननु हरिहरविरिंच्यादिदेववंद्यमापस्य किमिति कार
यनी स्तुतेराचरणमिति शिष्याशंकामपानिनीषुराह॥ शि
वः शक्त्येति। शिवः कल्याणरूपः सदाशिवः अविद्यातत्का
र्योपार्जितजन्ममरणाद्यनेकक्लेशरूपामंगलरहितत्वात् ॥१॥
शक्त्या कर्त्तुमकर्त्तुमन्यथाकर्त्तुं शक्त्या त्रिगुणात्मकप्रवेश्या
विद्यापरमनामधेयया यदि युक्तः। परिष्वक्तो भवति। न
दा प्रभवितुं प्रभुतां विधातुं शक्तः समर्थो भवति। सृष्ट्या
दिकार्ये अनुग्रहलक्षणं यत्कार्यं तत्र शक्तो भवति अवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घावच्छिन्नस्यैव ब्रह्मणो जगन्निर्माणे शक्तत्वादिति भावः। ननु
स्वतः प्रयोजनाभावात्कथं तस्य सृष्ट्यादौ प्रवृत्तिरित्यत आह।
देव इति। दिव्यति क्रीडति इति देवः। तथा च क्रीडार्थमेव प्रव
र्तते भगवान् सृष्ट्यादौ न पुनः प्रयोजनमुद्दिश्येति भावः।
न चेदेवं। तयोश्चेन युक्तस्तदा स्पंदितुं चलितुमपि न कु[blot] (कुशलः)
लः न क्षमः। तस्य स्वतो निर्धर्मकत्वादिति। तदुक्तं। शक्त्या
विना शिवे सूक्ष्मे नाम धाम न विद्यते इति। एतेन निर्गुणस्य
सृष्ट्याद्यकर्तृत्वाद्गुणत्रयात्मकमायानुग्रहापेक्षोक्तः
इदं च वेदांतिमते अन्यमतेपि। पुंरूपस्य शिवस्य भवानी
रूपशक्तिसंयोगादेव जगत्कर्तृत्वं नान्यथैवेत्युक्तं॥ तेनेन च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षित्यादिकं स्त्रीपुरुषोभयजन्यं। कार्यत्वात्। मनुष्यपशु
क्षिसरीसृपादिशरीरवदित्यनुमानं सूचितं। अथ च शि
वः शिवशब्दात्मा एकारेण अकार इकारात्मकेन यदि यु
क्तो भवति। तदा स्वकार्यं भगवदुपस्थितं कर्तुं शक्तो भवति।
न चेदेवं तदा स्पंदितुमपि अष्टपुटविभागमपि कर्तुं न
शक्तः। शकारवकारयोर्निःस्वरयोरुच्चारयितुमश
२॥ क्यत्वात्। अत एव शब्दात्मा विनाशिवे सूक्ष्मेनाम धाम
न विद्यते। यत्र नामपदं अनुच्चार्यमाणे त्वार्थकसूक्ष्म ॥२
पदं चोपास्तं॥ अथ वा शिवः ककारादिक्षकारांतः पंचत्रिं
शद्वर्णात्मकः शब्दात्मा अकारादिविसर्गांत षोडशास्वर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपयायुक्तोयदिभवतितदाप्रभवितुंवेदादिस्वरूपतयाव्यक्तिंभ
वितुंशक्तोभवति।नचेदेवंतदास्पंदितुमपिताल्वोष्ठपुटस्पंद
मपिकर्तुंनकुशलः।नक्षमः।तदुक्तंशारदायां॥विनास्वरैस्तु
नान्येषांजायतेव्यक्तिरंजसा॥शिवशक्त्यात्मकानादुस्तस्मा
द्वर्णान्मनीषिणइति॥मातृकाहृदयेपि।ककारादिक्षकारां
तावर्णास्तेशिवरूपिणः।समस्तव्यस्तरूपेणषट्त्रिंशत्तत्वविग्रहाः।
अकारादिविसर्गांताःस्वराःषोडशशक्तयः॥नित्याषोडशकाक
लानःपरस्परसमायुताः।शिवशक्तिमयावर्णाःशब्दार्थप्र
तिपादकाः॥शिवःस्वैःशक्तिमयोयोवर्णोस्वरपर्याधीनोनस्व रा
तंत्रःकदाचन॥स्वराःस्वतंत्राजायंतेनशिवस्तुकदाचनेति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथवाशिवोहकारःशक्त्याबालात्तृतीयस्वबिजरूपया।तेनप्रासादप
रामंत्रोद्धारः॥प्रभविष्णुमंत्ररूपतांगंतुस्पंदितुं।यद्वाशिवोबिंदुः
शक्त्याविसर्गेण।तेनानुत्तरमंत्रउक्तः॥तदुक्तंशिवदृष्टौ॥अ
हंबिंदुविसर्गस्वभावयोर्योगतःपरः॥प्रकाशितोनुत्तराख्योव
र्णोवर्णेष्वनुत्तरइति॥योगिनीहृदयेपि॥अन्याकाराद्विसर्गां
ताद्बिंदुप्रस्पंदसंविदः॥प्रकाशपरमार्थत्वात्स्फुरत्तालहरीयु
तान्॥प्रसृतांविश्वलहरीसामान्यस्थानत्रयात्मक इति॥एते
नशाक्तःप्रभवितुमित्याद्यपिव्याख्यातं॥अथवाशिवोहकारः
शक्त्याआरारपेति घक्षरवागवादिनेमंत्रउक्तः॥अनंतो ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नकुलीशाश्वविद्यावाग्वादिनीमनोतिविद्याप्रकाशिनिवचनात्‌।
अथवाऽशैवपंचाक्षरोहारोयं॥यथाशिवः शिवशब्दः शाम्याएकारे
पानमःपदेनचयुक्तः॥शक्तितस्तूर्यवर्णोयइत्याहवेकारस्य।प्रण
वोबिजमाख्यातंनमःशक्तिरुदिरितेत्यादोनमःपदस्यचशक्ति
पदार्थताप्रतिपादनात्‌।एकारेणचचतुर्थ्येकवचनेङेइत्यस्य
त्तिः।उकारलोपात्‌।प्रभवितुंमंत्ररूपेणाभीष्टादिफलंदातुं।ने
वेदेवमिसादेःप्रतिपादकमात्रस्यमंत्ररूपताभावेनयत्किंचित्‌
लदानेप्यसमर्थइसर्थोज्ञेयः।ततः।शिवस्यापिसामर्थ्यप्रदाभ
वानीअतोहेनोस्तांप्रणेतुंस्तोतुंवाअकृतपुण्यःअकृप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्मतः कथं प्रभवति समर्थो भिवति। न केवलं पंचब्रह्मांतर्गतसदा
वस्यैव तत्सापेक्षता ब्रह्मांतर्गतस्यापीत्याह। हरिहरविरंच्यादि
भिरपि विष्णुशिवब्रह्मादिरपि आराध्यां समर्चनीयामित्यर्थः॥
पाशादित्र्यक्षराभिप्रायेणावायोजनीयाभेदं पद्यं। यथा ह्रीति
याडं अतस्त्वा आमा आराध्याम्भीति पदच्छेदः। तेन शिवः शक्ति
॥५॥ भिन्नः। परमात्मा आमा आकारेण पाशाबिजेन शक्त्या भु
वनेश्वरीबिजेन हरिहरविरंच्यादिभिरपि ॐकारेण यदि युक्त
इत्यर्थः। हरिपदेन ॐकारस्य हरपदेन रेफस्य विरंचिपदेन ॥६॥
ककारस्योक्तवैपरीत्यनयोजनेनाद्धिजलोभादीनि। वयंतु।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचदशीविद्यांतर्गतमध्याद्विजास्मकमधुमतीबिजमुद्धराति। शिवइति
शिवोहकारः। शक्त्याःसकारेण हरिहरविरिंच्यादिभिः। लकार हकार
ककारवैपरित्येन यदि युक्तः। शक्तिः शक्तिर्पुनो भुवनेश्वरी ग्रांत इत्यर्थः॥
एवं सकलश्रीविद्यामंत्रमूलभूत तया वार्णवी मस्मंत्रोद्धारोद्देशः। यथा
शिवोहकारः शक्त्यासकारेण एकारेण ईकारेण च हरिहरवि
रिंच्यादिभिरपि यदि युक्तः हरिर्लकारः हसे बिंदुः अहं बिंदुर्वि
सर्गस्त्वमिह युक्तेः विरिंचिः ककारः। आदिपदेन रेफनादौ तत्प्रा
प्रभावेलं ना ना श्रीविद्यामंत्रता सुयगं तु मपिन कुर्यात्॥ तं
दुक्तं ज्ञानार्णवे। मूलविद्यांश्च कुप्रोढसकलागमसेवितं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

सर्वदुर्द्धर्षविघ्नांश्च विस्फुल्लामन्त्र्य योशिवे ॥ भुमिश्चंद्रः शिवो माया श
क्तिः कृष्णाध्वमानदौअर्हश्चंद्र इश्च बिंदुश्च नवर्णो मे रूपकरूपते ॥
महात्रिपुरसुंदर्या मंत्रा मे रससमुद्भवा । इति संगोपनार्थेनाचा
र्येणाशानार्णवीयक्रमे गोपितम् इति हेयं यदा शिव पदेन ककार
लकार हकार रेफाः । शक्ति पदेन ईकार एकार मकार माया
॥ १५ ॥ बिजानि । प्रभावेतु पंचदशी मंत्रतां गंतु अत एवं ज्ञो मायाभिः पु ॥ १५ ॥
रूरूपईयत इतिश्रुतिरप्यमुमेवार्थमाह । यदा शिवो गोपाला
ख्यादशाक्षरः शक्त्या पंचदश्या अष्टादशाक्षरः प्रत्येकपद
द्वे पंचदशीमंत्रस्य क्रमेणैव कर्कुठदानेन तं च संप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीगोपालमंत्रोद्धारादिति व्याकुर्मः। अथवा शिवशब्देनोर्ध्वमु
खत्रिकोणचतुष्टयं। शक्तिशब्देनाधोमुखत्रिकोणपंचकमु
च्यते। अभ यामलिताख्यं चक्रं। यदुक्तं च तंत्रे। शिवचक्रैः श्री
शक्तिचक्रैश्च पंचभिः। शिवशक्त्यात्मकं ह्येयं श्रीचक्रं शिवयो
र्वपुरिति। प्रभावितं तु तस्यादिकल्पे श्रीचक्राद्देवा हि स्तच्छिस्थि
तिसंहतयो भवंतीया गमिनः। तदुक्तं कामिके। त्वगसृङ्मां
समेदोऽस्थिधातवः शक्तिमूलकाः। मज्जशुक्रप्राणजीवधा
तवः शिवमूलकाः। नवधातुरयं देहो नवयोनिसमुद्भवः इ
ति। नवयोनिः श्रीचक्रं। अथवा शिवः शिरस्थसहस्रदल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्णिकावस्थितः शक्त्या मूलाधारो स्थापितं कुंडली न्याग भावतु
अणिमादि सिद्धा सकलमुत्कर्षमुत्साद यत्नं स्यंदितुं इव स्ति
नपि शाम्भुमिसेयर्थः कदाचिदपात्ललिता पुंरूपा रूपछविग्रहो वे
णुदीनो समारंभा दुष्कारोचैवशांजगदितितत्रवचनात् रक्षाणां वै
लोक्यजातानां कामौन्मादो कहेनवौ। वंशीधरं रूपस्तु देहं चका
रद्वापरे युग इति ॥ महाकालसंहितवचनात् रूपस्य पापिका
॥ ६ ॥ स्यायनी कृतया नस्परतयापि प्याकुर्मः। ननु भिमांसकादि ॥ ६ ॥
मतेजगत्कर्तुरीश्वरस्याभावान्निर्वर्पयनीयंस्तति रिस्या
स्तां कायनयनार्थं तान्तु पहरति तास्थिव इति। शास्त्र च मम वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ्यां वा निगच्छति इति शिवः। शीङ् स्वप्ने वा गतिगंधनयोरिति धातो
र्व्यांनिष्पन्नः। शिवशब्दवाच्यः मायोपरहितश्चैतन्यस्यैवेश्वर
स्याभावात्। शिव ईश्वरः शरीरस्याशरीरेणायादियुक्तः स्यात् तदा अ
भवितुं स्त्रष्ट्यादिकर्तृशक्तः स्यात्। तथा च क्षित्यादिकं सकर्तृ
कं कार्यत्वात्। घटवदित्याद्यनुमानेन तद्वेदकमेपास्तं शरीर
जन्यत्वोपाधेरनेनोक्तेः। न च देवं। शरीरयुक्तो न चेत् तदास्य
दितुमपि प्रयत्नाद्याश्रयीभवितुमपि न कुशलः। शरीरव्य
तिरेकेन प्रयत्नादेरनुपपत्तेः। नित्यप्रयत्नादौ मानाभाव
त्। अतो हेतोर्न्यायाग्रणेऽनुं स्तोतुं वाऽभद्रतापूर्वपाम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मांसकादिः॥ कथं प्रभवति समर्थोऽभवितुं आं निस्मये संबोधने वा। हे
हरा विरिंच्यादिभिरपि ईड्य शिवब्रह्मादिभिरप्याराध्य समर्चनी
य हे इति भगवत्संबोधनं॥ ॥श्लोकः॥ ॥तनीयांसं पांसुं ते
वचरणपंकेरुहभवं विरिंचिः संचिन्वन्विरचयति लोकानविक
लं॥ वहत्येनं शौरिः कथमपि सहस्रेण शिरसां हरः संक्षुभ्यै
७॥ नं भजति भस्मोद्धूलनविधिं॥२॥ ननु विरिंच्यादेरेव सृष्ट्या
दिकर्तृत्वेन भरतं अतः कथं तदाराध्यत्वं मम मेत्यत आह॥ तनीयांस
मिति॥ तनीयांसं सूक्ष्मं तव चरणपंकेरुहभवं त्वत्पादांबुजोद्भूतं
पांसुं रजःकणं विरिंचिः ब्रह्मा संचिन्वन् एकीकुर्वन्। लोकान्

तुर्दशभुवनानि अखिलं सामग्री वैकल्यरहितं यथास्यात्तथा विर
चयति। सृजति। एनं पंसुं चतुर्दशभुवनतया परिणतं संस्तुप
र्णी। भ्रूस्य भासितोहि धुलेनाविधिं भस्मस्नानं भजति करोति। अत
व अग्निरिति भस्म वायुरिति भस्म ज्योतिरिति भस्म जलमिति भ
स्म स्थलमिति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूंषि भ
स्मानीति भस्मस्नानमंत्रेषु भगवतादिनां भस्मालोकेरिति। वि
रूपक्षण्याख्य। भवानी पक्षे तु। चरेणाश्वेहारः शुक्लरक्तनिव
णाख्याः। सत्वप्रधानः शुक्ल रजप्रधानो रक्तः तमप्रधानो मिश्रः।
गुणा इति तेनि वर्णाः शुक्लरक्तयो राशाचक्रं। मिश्रस्य हस्तकम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं। निर्वाणप्रस्य सहस्य दलस्यानंतं शुद्धि गुणा। स्तः अस्मा। भिप्रेत रूढः।
स.ल. निर्वाणो विशिवः। तथा च रच्छचरणपंकेरुहभवं पांसुं रजो गुणं संचि
न्वन्विरिंचिः लोकानसृजति। शुक्लचरणपंकेरुहभवं पांसुं सत्व
गुणं संचिन्वन्विरचति। मिश्र चरणपंकेरुहभवं पांसुं तमोगुणं सं
चिन्वन्हरः संहरति। तदुक्तं दत्तात्रेयेण। भवन्मध्ये गोविंदहरी
१८॥ तव रच्छशुक्लौ पादौ रजो मलगुणो खलु सेव्यमानौ॥ स्वच्छसि
ती वितनुते हृदये त्वतीये माधिं भजन्न हरति विभ्रमनुदय गुणः॥
लु यं लवां वन्चरणान्निरूपाधि बोधं सांद्रं मर्तं शिवपदे स तते ॥८॥
न मामाति॥२॥ ॥श्लोकः॥ ॥अविधानामंतस्तिमिरामिह
मिरोद्धापनगरी जडानां चैतन्यस्तबकमकरंदश्रुतिझिरा॥ दरिद्रा
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णां चिंतामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा मुरारिपुवरा
हस्य भवती ॥३॥ अथ जड दरिद्रा त्वज्जीवनोत्तया कथं मत्प्रकृतिः का
र्या तस्याः अतिदुरूहतया बहुकालेन या प्राप्तुं बुद्धिधानाविरंजी
विसाध्यत्यादत आह । अविद्यानामिति । तथा चैतन्मे वं मम न दु
र्लभमिति भावः । अविद्यानां विद्याधर्मप्रतिपादकशास्त्रं तद्रहि
तानां अंतस्तिमिरस्य अज्ञानरूपांधकारस्याभिहरो ज्ञानं तद्दुद्दीप
नगरी तत्प्रकाशिका मिहिरद्वीपनगरीति क्वचित्पाठः । तत्र द्वा
दशादित्या यत्र युगपदुदयं प्राप्नुवंति ता हराद्वीपनगरीति भावः
जडानां कामादिशास्त्रीयज्ञानरहितानां अपटुराणां चैतन्यं ज्ञान
तस्य प्रकारः समूहस्तद्रूपो यो मकरंदः पुष्परसस्तस्य स्रुतिः क्षरणं त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याशिरासरणिः सरणीति पाठेनिर्झरस्तावक मकरंदेति पाठे स्तबकः उ
त्तलोत्तरस्फूर्तिसंपर्कः तेनमकरंदस्रुतेः विद्वज्जनचमत्कारधा
रास्तस्याः ॥ सिरासरणिः । दरिद्राणां निर्धनानां चिंतामणिगुणनि
निकाचिंतामणिमयिमाला जन्मजलधौ संसारसागरेनिमग्ना
नां मुररिपुवराहस्यविष्णुरूपादिवराहस्य दंष्ट्रा उद्धारकरीभ
वतीत्यर्थः ॥ अत्रविशेषणचतुष्टयेन धर्मार्थकाममोक्षजन
२॥ कत्वं भगवत्याः ज्ञातपादितं धर्मस्य तद्धारासुज्ञानस्याध्ययन
प्रदानं प्रथमेनोक्तं कामस्य चातुर्यस्याध्ययनयातद्वदानं द्वि ॥१॥
तीयेनोक्तं । तृतीये चतुर्थयोरर्थमोक्षदानार्थं फलस्य चतुष्ट
येमेवोतहेयं ॥ अथ च फलदानद्वारा बाल्यावस्थाजात्मकस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागवत्याः सूचितं। तदुक्तं त्रिपुरार्णवे। हरस्यज्ञानमज्ञानां जडु
मानमतेः पुनः॥ इतः कामान्वितनुते कैवल्यं कलया विधोः॥
वाग्भवं प्रथमं बीजं वेदानां पुरतो यतः॥ त्रिपुरा सद्वयाभ
देत्वद्रूपा विश्वविग्रहा। वाच्यवाचकरूपेण व्याप्तो सूमितवे
भेवमिति। विष्णुपक्षे। भवति त्वयि विद्यमाना त्वं दं कस्यैका अस्य
विष्णोस्त्रीपुंयोगात् दाख्यायामीति ङीप्॥ ई लक्ष्मीरविद्यानामि
त्यापुरूपेयर्थः। तथाच हत्त्वयि प्रपन्ने अविद्यारहितो भ
विष्यामीति किमत्र चित्रमिति भावः॥ २॥ श्लोकः॥ त्वदन्यः पा
णिभ्यामभयवरदो दैवतगणस्त्वमेका नैवासि प्रकटितव
राभीत्यभिनया॥ भयात्त्रातुं दातुं फलमपि च वांछासम
धिकं शरण्ये लोकानां तव हि चरणावेव निपुणौ॥ ४॥ म

दन्यादेवताकुतोनभ्रयतआह।त्वदन्यइति।त्वदन्यः दैवतगणःपा
णिभ्यामेवाभयवरदः अभयवरमुद्रामात्रधारकः त्वंपुनरे
काप्रकटितोवराभीत्योरभिनयोययातथानास्तितवअभि
नयमात्रधारणंनास्ति अपितुवराभयदात्वमपितत्रहे
तुमाह॥भयादिति।हियतःभयात्त्रातुंवांछासमधिकंफ
लंदातुंतवचरणावेवनिपुणावित्यन्वयः।यद्वात्वमेवैकाप्र
कटितवराभीत्यभिनयानास्ति॥अपितुत्वदन्योपिदैवतग ॥९॥
णःपाणिभ्यामभयवरदः।एतावतासाम्येनवैलक्षण्यंततो
भगवत्याइत्याह।भयादित्यादि।अथवापाणिभ्यामभयव
रदःत्वदन्यस्त्वदन्यत्वेनप्रतीयमानोदैवतगणस्त्वमेवैका
नासी।अपितुत्वमेव।कीदृशीत्वं।प्रकटितवराभीत्यभिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यातथापिभयात्त्रातुंवांछासमधिकंफलंदातुंतवच्चरणावेवहे
अरणत्वेनोपस्थितावेवनिपुणौसमर्थाविसन्वयः॥ विष्णुप
क्षेत्वदन्योदैवतगणः गणोन्द्रादिःपाणिभ्यामेवाभयवरदः
प्रकटितवराभीत्यभिनयाएकागौरीत्वंनासि।अपितुत्वमे
वभयात्त्रातुंवांछासमधिकंफलंदातुंलोकानांशरण्यग
णनायांप्रस्तुतेतवच्चरणावेवनिपुणौगणनाहौइहलोका
नांकामेंइच्छितवस्तूनांशरण्येहेइतिसंबोधनं॥ए
काक्षरकोशेइकारनकारउकारककाराणांकामादिवा
चकत्वेनोक्तत्वादिति॥४॥श्लोकः॥हरिस्त्वामाराध्यप्रण
तजनसौभाग्यजननींपुरानारीभूत्वापुररिपुमपि

भमनयत्॥स्मरोपि त्वां नत्वा रतिनयनलेह्येन वपुषा मुनी
नामप्यंतः प्रभवति हि मोहाय जगतां॥५॥मम प्रभावः कु
त्र दृष्ट इत्यत आह। हरिरिति। पुरा अमृतमथनानंतरं ह
रिर्विष्णुस्त्वां प्रणतजनसौभाग्यजननीमाराध्य नारी भू
त्वा मोहिनीरूपं विधाय स्मरहरमपि क्षोभं मदनाधीनत्वं
अनयत्॥येन स्मरोपि भस्मीकृतः तस्य मदनाधीनत्वं त
॥११॥ वप्रसादेनैव अन्यथासंभावितमेवेति भावः। यद्वा हे प्रण ॥१०
तजनसौभाग्यजननी ईं ईंकाररूपा त्वां आराध्येत्यन्वयः।
स्मरोप्यनेनैव प्रकारेण त्वां नत्वा वपुषा शरीरेण म
हतां मुनीनामप्यंतमोहाय प्रभवति इत्यन्वयः। वपुषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्लीं दर्शनेन। रतिनयनलेह्येन रतिः कामपत्नी तन्नयनाभ्यामास्वा
दनीयेन भातिसुंदरेत्यर्थः। तदुक्तं वामकेश्वरतंत्रे। एतामेव प्र
राध्याता विद्यां त्रैलोक्यमोहिनीं॥ त्रैलोक्यं मोहयामास कामः
भगवान् हरः॥ कामदेवोपि देवेशि महात्रिपुरसुंदरी॥ समा
राध्याभवल्लोके सर्वसौभाग्यसुंदर इति। तैत्तिरीयश्रुतिरपि।
जनकोह वैदेहः अहोरात्रैः समाजगामेति। जनकः एतद्विद्या
प्रवर्तकः विदेह एव वैदेहः। कामः। अहोरात्रैः अहोरात्रात्म
कैः पंचदशाक्षरीमंत्रवर्णैः दर्शादिपूर्णिमांतकलात्मकैः समा
जगाम तं मंत्रं आहृतवानिति तदर्थः॥ विष्णुपक्षे हरिरंगे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मे मरण पानंतरं खा मारा ध्यअ नारी भ खा भण त ज न सौभाग्य जननं
गौरी तथा स्मर हर मपि क्षोभं वि स्मय ज न यत्। प्रा पया मास्ते स्य र्थः
शेषं स मानं ॥५॥ ॥श्लोक॥ ॥धनुः पुष्पं मौर्वी मधुकर म यी
श्री पं च विशिखा व सं तः सामंतो म यमरु द्यो धन रथः ॥ तथा प्ये
कः सर्वं हिमगिरि सुते का मपि कृ पा मपांगात्ते लब्ध्वा जगादद म
नंगो विजयते ॥६॥ ॥नतु पुरुष स्य नारीरूप ग्रहणं नार्या वा
पुरुषरूप ग्रहणं मा श्चर्य जन कमिति भवतु तत्र मनुष्य सादृ
॥३४॥ पयोगः कंदर्पस्य तु मुनि मोह कत्वं स्य सा मर्थ्यं सं पयैव भाविष्य ॥२६॥
तीत आह ॥ धनुः पौ ष्पा मि ति ॥ त था न त दी यास्ता में स्ये व नेद
शा ग तिभा वः ॥ धनुः पौ ष्पं पुष्पम यं तु कुसुमा रं न वज्यो प मा भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह॥ क्वणदिति॥ क्वणन् शब्दायमानं कांचीदाम क्षुद्रघंटिकास्रक् यस्याः सा
तथा करिकलभः करिशावकः स्तत्कुंभवत्स्तनशोभा यस्याः। सा करि
शावकस्योपरंजकः करिपुंकं प्रकारं लभते इति करिकलभः करिश्रेष्ठ
इति केचित्॥ मध्येउदरेपरिक्षीणा कृशा परिणतः परिपूर्णः शारला
लीनोपर्वेंदुस्तद्वद्वदनं यस्याः सा तथा करतलैः धनुः कोदंडं बाणा
न्शरान् पाशं रज्जुविशेषं सृणिं अंकुशं दधाना धारयंती नोस्मा
पुरस्तादग्रे आस्तां तिष्ठतु। कीदृशी पुरमथितुः शिवस्य अहोपु
रुषिका अहोपुरुषोहमित्याभिमानभूपा अहोपुरुषिका दर्पा धा
स्यात्संभावनात्मनीयमरकोशात्। अत्र पाशपठो रूध्यर्थो वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मकरयोः। अंकुशबाणयोरूर्ध्वाधोदक्षिणकरयोर्ध्यानं। दक्षियोर्ध्वक
रे पाशं वामोर्ध्वकरेंकुशं शाभिनाभि स्तुंति। अत्र धनुरेखावं। बाणा
स्त्र कमलनिभ कमल कल्हारभैरव सहकारमंजरी रूपास्तत्र राजा
दानुरूपाः। अंकुशो नानारत्नखचितं सुवर्णमयं। पाशो रक्तपद्मनिर्मि
तः। वित्तुपद्मो। नोस्माकं पुरमाधितुः आगत्त्वम सुखु स्यवस्थाना
॥२४॥ शाकस्य अस्मन्मोक्ष प्रदस्याविष्णोरग्रे अहो पार्षिका पार्वतीरू ॥२४॥
पा आस्तां तिष्ठतु। अप्रयोजकत्वात्। मोहिनी मूर्चैः शिवक्षोभ
कतया तत्तोपि सुंदरत्वादित्याशयः। ऊर्ध्वाभ्यां मणिवंशावाद
नपरं तु ऊर्ध्व सत्सुस्ताकं पाशं चांकुशमेधवं धनुरिक्षुं पोषं
दधानं करैः। आपीनोपपारंदतं सुरतरोर्मूलेस्थितं हाश्रणं स्वा

धो

वेषं मणिभूषणोज्वलमनुस्मरंतं भजेत्सुंदरमिति सुंदरी गोपाला

भिप्रायेण षेडसंगमनीयं ॥७॥ ॥श्लोक॥ ॥सुधासिंधोर्मध्येसु

रविटपवाटीपरिवृते मणिद्वीपेनीपोपवनवतिचिंतामणि

गृहे॥शिवाकारे मंचे परमशिवपर्यंकनिलयां भजंति त्वां ध

न्याः कतिचन चिदानंदलहरीं॥८॥ ॥सुधासिंधोरिति॥सुधा

सिंधोरमृतांबुधेर्मध्ये सुरविटपिनां कल्पवृक्षाणां पावाटी

तया परिवृते वेष्टिते मणिद्वीपे नवरत्नरचितेद्वीपे नीपोपव

नवति कदंबारामरमणीये चिंतामणिगृहे चिंतामणिरत्नरचि

ते॥कुड्यस्तंभादियुक्तमंदिरे शिवाकारे मंचे शिवानां ब्रह्म

विष्णुरुद्रेशानानामाकारात्मकत्वेन यत्र तादृशे मंचे खट्वारूपे पर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंचशिवः सदाशिव एव पर्यंकः कशिपुतया स्थितः तस्मिन्निलयो
वस्थानं यस्यास्तां । ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरस्य सदाशिवः ।
एते पंच महाप्रेता पादमूले व्यवस्थितौ इति वचनात् । तदुक्तं
रुद्रयामले । यस्य नो पश्चिमं जन्म न स्वयं यो महेश्वरः । स नैव प्रा
प्नोति परमं दशपंचाक्षरीमिमां श्रितिं । एतादृशीं त्वां कतिच
॥२५॥ न धन्याः पश्चिमजन्मानः स्मरंति स्वच्छि चक्रं सुधासिंधुः सौ
भाग्यं सुरवाटिका दशारयुगलं रत्नद्वीपं नीपवनं तथा चिं ॥२५॥
तामणिगृहं रम्यमष्टादशारं परमैश्वरी त्रिकोणं मंचरूपं
तु बिंदुचक्रं सदाशिवः इति वचनात् प्रथोवा । अथ वा सुधासिं
धुरासवसमुद्रः सुरविटपिकुलवृक्षः भवानीरूपो मणिरत्न
द्वीपाय ग्निपोपवनः । चिंतकमणिर्यस्मात् तादृशो गृहे अवां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लरूपेशिवाकारेवरांगरूपेपरमशिवोबिंदुःचिदानंदलहरीसर्वे
षामानंददानामित्यादिश्रुतेः स्वरूपांइत्यर्थपर्यालोचनयापंच
मयागोप्यत्वसूचितःकीदृशीचिदानंदलहरीविज्ञानसुखतरं
गास्तिकामित्यर्थः।शिवएकारस्तेनत्रिकोणंपरमशिवोबिं
दुःश्रीचक्रांतर्गतत्रिकोणमध्येनियामित्यर्थइत्यपिवदंति।
विघ्नपक्षे।नीपोवनेतिवृंदावनेपितस्यमत्वात्।सौंदर्यांति
शायेनशिवमप्याकारयंतीतिशिवाकारेकल्याणरूपेवामं
चेरवद्वायांहेपरमशिवपरमकल्याणस्वरूपपर्यंकनिल
योचिदानंदलहरीरूपांत्वांकृतिचनपुरुषाभजंतीत्यर्थः।।१८
श्लोकः।।महीमूलाधारेकमपिमणिपूरेहुतवहंस्थितंस्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६॥ धिष्ठाने हृदि मरुतमाकाशमुपरि॥ मनोपिभ्रूमध्ये सकलमपिभि
त्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसे॥९॥ क्रमेण
कांचीमादिनास्थूलध्यानंचिदानंदलहरीमिषेनेन परं ध्या
नेमुक्त्वा सूक्ष्मध्यानमाह॥ महीमिति॥ मूलाधारे चतुर्दले म
हीं पृथ्वी स्वाधिष्ठाने कं जलं मणिपूरे नाभिचक्रे स्थितं हु
तवहं स्वाधिष्ठानमणिपूरयोः संज्ञा व्यत्ययः शांभवमते ते
ति वा हृदि अनाहते मरुतं वायुं उपरि कंठे विशुद्धचक्रे आका
शं भ्रूमध्ये आज्ञाचक्रे मनः अंतःकरणं एवं सकलमपि
कुलपथं षट्चक्रं जित्वा सहस्रारे द्वादशांते कैलाससंज्ञ
कपत्या कांतेन शिवेन सह रहसि एकांते विरहसीत्यर्थः॥ ॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिहस्रोपाने।। कुंडलिन्यासहाभेदे योगी सज्यति मेदिनीं।। सलि
लं स्थानयोगेन जले चरति योगवित्।। वन्हेर्भेदे ज्वलंमिव स्व
रात्यग्निं ज्वलत्स्थितं।। मरुद्भेदे शीघ्रगतिर्याति क्रोशशतं क्षणा
त्।। व्योमभेदे खेचरति मनोभेदे मनोगतिः।। यत्र कामयते त
त्र याति लोकत्रयेपि च।। संयोजयेच्छिवपदे शिवएव प्रजाय
ते।। कर्त्ता हर्त्ता च सर्वत्र सुरासुरनमस्कृत इति सिद्धविशेषा पु
रुः।। कुंडलिनीरूपा पिंडमेवेति विद्युत्पल्लोपिलापर्यं कुंडलि
न्यास्तावद्भूमिकात्रयं तत्रोग्नेयभूमिकामहीमित्यादिनोक्ता।। (
श्लोकः।। ।। सुधाधारासारैश्चरणयुगलांतर्विगलितैः प्रपंच
सिंचंती पुनरपि रसाम्नायमहसा।। अवाप्य स्वां भूमिं भुजग

निर्भयप्रशुष्टवलयं स्वमात्मानं कृत्वा स्वपिपिकुलकुंडे कुहारिति॥१०॥
अन्वयभूमिकां प्रत्याहृत्तिभूमिकां चाह। सुधाधारासारैरिति।
सुधाधारासारैः स्यन्दितधारासंपातैः चरणयुगलांतर्विगलि
तैः भ्रूमध्यगतैर्भुक्तचरणमध्यमार्गतोनिष्पंदमानैः
प्रपंचं मानससरस्थानादि षट्चक्ररूपं कुलपथां सिंचंती स्वनेन ना
न्वयभूमिको का॥ प्रत्याहृत्तिभूमिकामाह। पुनरपीति।
॥१७॥ रसाम्नायाः षडाम्नायाः पूर्वदक्षिणपश्चिमोत्तरोर्ध्वानुत्त
राः शांभवाम्नायाः स्थानानि पार्थिवाप्पानलवायव्यनाभ १७
समानसाः शांभवाम्नायाः एतेषां स्थानान्युत्तरादिक्रमेण
आज्ञामध्यादि मानसादिक्रमेण वा॥ एतेषां महसा ए

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षांषण्णांप्रकाशकंतेजसास्वांभूरश्मिंमूलाधारंअप्राप्यवालब्ध्वा
आत्मानंस्वस्वरूपंभुजगनिभंसर्प्पाकारंअध्युष्टवलयंसा
ईत्रिवलयंरत्नाकुलकुंडेमूलाधारांतर्गतचतुर्दलपद्मक
र्णिकामध्यवर्त्तिनित्रिकोणेकुहरिणिकुहरंरंध्रविशेषस्तद्व
तिगुप्तस्थलेस्वपिषिशेषतदुक्तं।।मूलादिब्रह्मरंध्रांतरक्तो
र्णातंतुसन्निभां।।कुलकुंडलिनींनित्यांविद्युद्वल्लीसदृक्तनुं।
मत्तालिकुलझंकाररसदक्षतरनादिनीं।उन्नीयोन्नीयचक्रे
षुक्रमात्स्यतिवैभवं।अनुभूयपरंगत्वापीत्वाकुलपरामृ
तं।अकुलात्कुलकंभूयः।कुलारकुलकंमहेः।।एवंमांसुं
दरींध्यायेसूक्ष्मध्यानप्रकाशितमिति।एवंवेदवाविष्णु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पक्षेसंगतिः॥१०॥श्लोकः॥चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंच
भिरपिप्रभिन्नाभिः शंभोर्नवभिरिति मूलप्रकृतिभिः॥त्रयश्च
त्वारिंशद्वसुदलकलाब्जत्रिवलयत्रिरेखाभिः सार्द्धं तव भव
नकोणाः परिणताः॥११॥श्रीचक्रमुद्धरति। चतुर्भिरिति। श्री
कंठैः शिवैः ऊर्ध्वमुखत्रिकोणैः चतुर्भिः चतुःसंख्याकैः तथा
शिवयुवतिभिः अधोमुखत्रिकोणैः पंचभिः पंचसंख्याकैः
॥१८॥ अधः प्रपन्नाभिः संबद्धाभिरिति अनेन प्रकारेण शंभोर्नव
भिः मूलप्रकृतिभिः श्रीचक्रकारणभूताभिः नवयोनिभिः ॥१८॥
यद्वा मूलप्रकृतिभिः प्रपंचस्य मूलकारणैः यदुक्तं कामिका
यां॥त्वगसृङ्मांसमेदोस्थिधातवः शक्तिमूलकाः॥मज्जशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्र प्राणजीव धातवः शिवमूलकाः। नव धातुरयं देहो नव योनि
समुद्भव इति। नव योनिः श्रीचक्रं वसु दलमष्ट दलं कलाङ्कं
षोडशदलं त्रिवलयं वृत्तत्रयं त्रिरेखाः भू बिंब रेखात्रयं
एभिः सार्द्धं सह तवत्रयश्चत्वारिंशाद्भवन कोणाः गृह कोणाः
परिणताः तदुक्तं। बिंदु त्रिकोण वसुकोण दशार युग्म मन्व
स्र नाग दल संयुत षोडशारं॥ वृत्तत्रयं च धरणी सदनत्रयं
च श्रीचक्रराज उदितः परदेवतायाः॥ इति प्रस्तारवशात्
त्रिकोणस्याधः स्थितकोणद्वयस्याष्टकोणांतर्गतत्वात्रि
चत्वारिंशात्वमिति प्रांचः। वस्तुतस्तु भवनकोणाः श्रवेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपाणि त्रिकोणानि तदुक्तं। दक्षिणामूर्त्तिसंहितायां। चत्वारिंश
द्भागैर्युक्तं त्रिभागैरपि पार्वती॥ अस्याधारक्रमस्तु वृत्तं वृ
त्वेष्टमानेन सूत्रं पूर्वापरायतं॥ विन्यस्य विभजेदष्टचत्वा
रिंशद्विभागतः॥ षष्ठे पष्ठे पंचमे च तृतीये प्यतृतीयके॥
चतुर्थे च तृतीये च षष्ठे षष्ठांशके पुनः॥ विधाय नव चिन्हा
नि तेषु सूत्राणि पातयेत्॥ नव याम्योत्तराग्राणि तेषामु
॥१९॥ भयपार्श्वतः। आद्यद्वितीये तु यांतिं तथा पंचमषष्ठयोः। ॥१९॥
अष्टमांतिमयो विद्वान् अग्निवेदकलांशकान्। पुराणद्य
ष्ट वेदाग्निसंख्यांशान् मार्जयेत्क्रमात्॥ शानि मध्ये रवेरंतौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंद्रांतौ केतुमध्यतः। मंगलांतौ वृत्तमध्ये बुधांतौ राहुमध्यतः।
गुरौरंतौ भौममध्ये भृगुक्रांतौ सोममध्यतः॥ शान्यंतौ वृत्तम
ध्ये तु राहंतौ रविमध्यतः॥ केत्वंतौ बुधमध्ये तु योजयेत्क्रम
तो बुधः॥ मध्ये वंन्हिस्फुरद्रूपे मस्यं द्विदशाबिन्हिकं। चेत्तु
र्द्दशानलो घोतं श्रीचक्रं जायते परं॥ ज्ञातं द्विहिर्वसुपत्रा
ब्जं तद्विहिः षोडशाच्छदं॥ वृत्तत्रीतयसंशोभि त्रिरेखां चिं
तभूगृहं॥ त्रिधामनिलयं द्वारचतुष्टयसुशोभितं। सर्व
तेजोमयं दिव्यं सोमसूर्याग्निलात्मकं॥ इति। अत्र रव्यादिसं
ज्ञा अधस्तन रेखामारभ्य ज्ञेया॥ विष्णुपक्षे। चतुर्भिः चतुः
संख्याकैः श्रीकंठैः शिवैः ब्रह्मरुद्रेश्वरसदाशिवरूपैः पं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चभिः त्रिशावसुवतिभिः।श्रीविद्यालहरिताचैव पारिजातेश्वरीतथा॥
त्रिपुरा पंचबाणेशी पंचकल्पलतास्मृताइत्यादिनोक्ताभिः।।
शंभोर्महेश्वरस्य प्रकर्षेण भिन्नाभिर्मूलप्रकृतिभिः जल
घृष्टमूर्तिभिः जीवात्मना सह नवभिस्तथा त्रिवलयं लोक
त्रयं तदेव रेखात्रयं तोभिश्च साद्धत्रयश्चत्वारिंशद्दिंद्रादिदे
वतास्तव भवनमिव भवनं देहस्तस्य कोणाएकदेशाः प
॥२०॥ रिणताः हे वसुदल नसुधनंद दोतीति वसुदोदाता तं लाय
नुह्नातिइसर्थः। कलानां चतुःषष्टिकलानामकला चंद्रप ॥२०॥
काशाकहेसर्थः ११॥ श्लोकः॥ त्वदीयं सौंदर्यं तुहिनगिरि
कन्ये तुलयितुं कवींद्राः कल्पंते कथमपि विरिंचिप्रभृतयः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदालोक्योत्सक्याद मरललनायांति मनसातपोभिर्दुःप्रापाम
पि गिरिश्त्रासायुज्यपदवी॥१२॥वदीयमिति।हेतुहिनगिरिकं
न्येत्वदीयंसौंदर्यंतुलयितुंउपमानोपमेयभावेनवर्णयितुं
विरिंचिप्रभृतयोब्रह्मादयःकथमपिकल्पातेनकथमपी
त्यर्थः।उपमानाभावादितिभावः।अमरललनाःदेवांगनाः
यत्सौंदर्यमालोक्यमनसागिरिश्त्रासायुज्यपदवीयांतीस
न्वयः।एतेनयदिवयंशिवरूपाभावामस्तदाएतस्याःसौंदर्य
मुपभुंजीमहइत्सुकंभवति।अथवाअमराणांललनंविलासो
येषांतेसाधकाःऔत्सुक्यादोलक्यध्यायसौंदर्यंमनसाआ
लोक्यध्यात्वातपोभिःदुःप्रापांगिरिश्त्रासायुज्यपदवींयांति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राप्नुवंतीत्यर्थः। अर्थात्साधका अमरललनाः देवांगनाः यांतिप्रा
प्नुवंति गिरिजा सायुज्यपदवीं च प्राप्नुवंति इत्यर्थः तिमप्रति
भातिएतेन ध्यानस्य भोगमोक्षप्रदत्वमुक्तं भवति॥ विष्णुपक्षे
तुहिनगिरिकन्या गौरी ई लक्ष्मीस्तथाविरंचिप्रभृतयः क
वींद्रास्तव दीयं सौंदर्यं तुलयितुं न समर्थाः। अमरललना
भोगैकमात्रपरा अपि। यद्वा हे अमरललना अपि गोपयुव
तयोपिस्वत्तोग्भुचिस्वभावा॥ यत्सौंदर्यं मनसा आलोक्य
॥२१॥ ध्यात्वा तव सायुज्यपदवीं यांति। हे गिरित्रेति संबोधनं गि
रौ गोवर्द्धने गोपीरमयन् त्रायते गिरिं मंदाराचलं क्षीरसमु
द्रमंथनेन न च्यवति तेन करोतीत्यर्थः॥१२॥ श्लोकः॥ नरं ॥२१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्षीयांसं नयनविरसं नर्मसु जडं तवापांगा लोके पततिमनुधा
ल वंति शातशः ॥ गलद्वेणीबंधाः कुचकलशयाविस्रस्तसिचयाहठा
त्त्रुट्यत्कांच्यो विगलितदुकूला युवतयः ॥१३॥ नरमिति । वर्षी
यांसं वृद्धं नयनविरसं कुरूपं नर्मसु कामक्रीडासु जडं अनभि
ज्ञं एतादृशमपि नरं मनुष्यं तवापांगा लोके अपांगेन यदालो
कनं तस्मिन् पतितं तज्ज्ञात्वा नंशातशो युवतयो अनुधावंति ।
कीदृशाः गलद्वेणीबंधाः विगलितकबरीभाराः कुचकलशा
द्विस्रस्ताः भ्रष्टाः सिचयाः कंचुलिकाः यासां ताः हठात् निःकार
णात् त्रुट्यत् कांच्यः छिन्नक्षुद्रघंटिकाः विगलितदुकूलाः
भ्रष्टोत्तरीया इत्यर्थः ॥ विष्णुपक्षेप्येवं ॥१३॥ क्षितौ षट्पंचाशद्धि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समधिकपंचाशदुदके कृताशो द्वाषष्टिश्चतुरधिकपंचाशदनि
ले॥ द्विविह्निः षट्त्रिंशन्मनसि च चतुःषष्टिरिति येमयूखास्ते
षामुपरि तत्त्वपादांबुजयुगं॥१४॥ क्षितावित्ति॥ क्षितौ म
लाधारे षट्पंचाशद्दले पार्थिवतत्त्वरूपाः अष्टाविंशतिरश्मयः
पार्थिवतत्त्वानि च पंचतंन्मात्राः पंचभूतानि पंचज्ञानेंद्रियाणि
पंचकर्मेंद्रियाणि अंतःकरणचतुष्टयं कालःप्रकृतिपुरुषम
हत्तत्त्वानीति अष्टाविंशतिः शिवशक्तिसंबंधभेदेन द्विविधा
॥२२॥ नि तेन षट्पंचाशत्॥५६॥ एषां नामान्यग्रे वक्ष्यंते॥ उदके म ॥२२॥
णिपूरे द्विपंचाशद्दले आप्यतत्त्वानि षड्विंशतिः पंचभूतानि
पंचकर्मेंद्रियाणि पंचज्ञानेंद्रियाणि तेषामेवार्थदशमनइति

CC-0. In Public Domain,Kavikulguru Kalidas Sanskrit University Ramtek Collection

शैवशाभेदेन द्विपंचाशत्॥५२॥ तारोस्वाधिष्ठाने द्विषष्ठि दले तैज
सतत्वानि एकविंशत् पंचभूतानि पंचतन्मात्राः पंचज्ञानेंद्रियाणि
पंचकर्मेंद्रियाणि तेषामर्थादिशा मन इसे कविंशत् शिवशा-
क्त्योर्विभागेन द्वाषष्ठिः॥६२॥ अनिले अनाहते चतुःपंचाशद्द
ले वायव्यतत्वानि सप्तविंशतिः महत्तत्वन्यून पार्थिवतत्वानि
शिवशक्तिविभागेन चतुःपंचाशत्॥५४॥ दिवि विशुद्धचक्रे
द्विसप्तति दले व्योमतत्वानि षट्त्रिंशत् शिवशक्तिसदाशिव
ईश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्र
कृति अहंकारबुद्धिमनःज्ञानेंद्रियकर्मेंद्रियशब्दस्पर्शरूपरसगं
धपंचभूतानीति शिवशक्तिविभागेन द्विसप्ततिः॥७२॥ म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसिआज्ञाचक्रे चतुषष्टिदले मानसतत्वानि द्वात्रिंशत् तथाहि
पराचतुर्विधा परा पश्यंती मध्यमा वैखरीति। इच्छा पंचधा॥
कर्तुं कारयितुं उपकर्तुं उदासितुमिति। ज्ञाता चतुर्विधा॥
त्रिविधं सालंबनं चेति सालंबनं त्रिविधं। ह्रीत्वज्ञे यत्नेभिरू
पेण विभिन्नरूपेण निरालंबवत्वं। अहंत्व दीयं मदीयमिति
चतुर्विधमपि द्रेकत्वेन परिगणितं। क्रिया सप्तधा। इष्टं
तं स्वाध्यायः जपः एजो तपो दानमिति कुंडलीभूमिकाभेदे ॥२३॥
॥२३॥ न चतुःषष्ठिः। ६४॥ एवं पार्थिवादितत्वरूपाः षष्ट्युत्तरत्रिश
तं मरीचयः शांभवाः। तदुक्तं कुलिकातंत्रे॥ आदौ पराच
तुर्धा स्यात् द्वितीये इच्छा च पंचधा॥ तृतीये वेदधा ज्ञाना चतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिः समधा क्रिया॥ पंचमी कुंडली द्विर्द्धिः षष्ठी स्यान्मातृका ष्टधा॥
परतो जायते छाहि सा च — म पातिः स्मृता॥ षट्त्रिंशन्नायिका
प्रोक्ता कंठस्थाने समाश्रिता॥ इच्छातो जायते ज्ञानं सा च वायो
रधीश्वरी॥ सप्तविंशति रश्मीनां पतिः सा ना हताश्रया॥ ज्ञा
नतो भवतु क्रिया व्यक्ता सा च वन्हीश्वरी मता॥ एकत्रिंशद्रश्मि
पतिः स्वाधिष्ठानं समाश्रिता॥ क्रियातः कुंडली व्यक्ता सा स्या
त्सलिलनायिका॥ सप्तविंशति रश्मीनामपि परं समाश्रिता॥
कुंडल्या मातृका जाता सा क्षितेरीश्वरी मता॥ अष्टाविंशति र
श्मीनामधिपा धार माश्रिता॥ शिवशक्तिविभागेन द्विवि
धा शांभवा मता॥ षट्पंचाशदुत्तरं च त्रिशतमेवं शांभुमरीचयः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४॥

पराद्यिशक्तिभिः षड्भिर्नायकैः सहिताः पुराः॥ द्विसप्तसप्तधिक
त्रीणि शतान्याकु मनीषिणः॥ एषांस्मरणमात्रेणजीवन्मु
क्तो महीं चरेत्॥ सर्वेषां स्मरणेऽशक्तः षड्भुचैकमपि स्मरे
त्॥ एतेषां स्मरतितो लोकः पापहाए जनास्तु नः॥ लक्ष्मीवा
न् ध्यानतो जीवन्मुक्तो ऽस्मिकुलेवशोदिति। शिवस्यानिः
प्रपंचस्य परमार्थशरीरिणः॥ चिदुल्लासा स्वराजाता पंच्या
नां मातृरूपिणी॥ अन्वयानां मातृयोगात् सेका षोढा प्रजा ॥२४॥
यते॥ - - - - - तथा ह्यानाक्रियाकुंडलिनीति च॥ मातृका
चाएधा प्रोक्ता परा भेदास्ततः स्मृताः। कुंडली मातृ ध्यां च
षोढा विश्वमय पंकं॥ नानाविधं सुविततं तंत्रमेतत्सड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्वये॥ उसनंस्तां भवंपश्चात्ज्ञागदेतश्चराचरमिति॥ अथपार्थिवा
दिचक्रेश्वमीनांनामानि॥ उड्डीश्वरः उड्डीश्वरी॥ जालेश्वरः॥ जाले
श्वरी॥ एर्णेश्वरः॥ एर्णेश्वरी॥ कामेश्वरः॥ कामेश्वरी॥ श्रीकंठः॥ ग
गना॥ अनंतः संरसा॥ त्र्यंकरः॥ मतिः॥ १४॥ पिंगलः॥ पातालदेवी॥ १६॥
नादाख्यः नादा॥ १८॥ आनंदः डाकिनी॥ २०॥ आलस्यः त्राकिनी॥ २२॥
महानंदः लाकिनी॥ २४॥ योग्यः काकिनी॥ २६॥ अतीतः शाकिनी॥ २८
पादः हाकिनी॥ ३०॥ आधारेशा रक्ताले॥ ३२॥ चक्रीशः चंडा॥ ३४
कुरंगीशः कुशला॥ ३६॥ मदध्रीशः महोघुष्मा॥ ३८॥ अनादिवि
मलः मातंगी॥ ४०॥ सर्वज्ञविमलः पुलिंदी॥ ४२॥ योगविमलः श
बरी॥ ४४॥ सिद्धिविमलः वाचापरा॥ ४६॥ समयविमलः कुला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिका॥४८॥ मित्रेशाः कुब्जा॥५०॥ उड्डीशाः लज्जा॥५२॥ षष्ठीशाः कु
लेश्वरी॥५४॥ चर्यांघीशाः कुलजा॥५६॥ एते पार्थिवरश्मयः॥ म
लाधारे षट्पंचाशद्दलं कमलं विचिंत्य तत्कर्णिकायामग्नेरप्ये
मापोत्रिशौ संपूज्य दलेषु रश्मयः पूज्याः शिवे आनंदनाथ
श्रीपादुकां पूजयामीति योज्यं॥ शक्तौ अंबादेवी श्रीपादुकां पू
जयामीति योज्यं॥ एवं सर्वचक्रेषु अथ कामकर्णिषट्कोणं
विचिंत्य पश्चिमादितः रश्मीन् पूजयेत्॥ तद्वत्पद्मबाह्ये
॥२५॥ षट्कोणं सिरसि ध्यात्वा पश्चिमादिषु अनुक्रमात्॥ कोणेषु
पूजयेयत्ना दष्टाविंशतिकं क्रमात्॥ चतुष्कं पंचकं षट्कं च ॥२५॥
तुष्कं पंचकं पुनः॥ चतुष्कमिति संभिन्नाः क्रमात्पार्थिवर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मयेइति म॰ मानपिविलिख्य एजयंति। अथाष्पारस्मयोमणिपू
रांग्नं भवक्रमे स्वाधिष्ठानमणिपूरयोर्व्यत्यय:। तेन्चासद्योजात:
माया।२।वामदेव: श्री:।४।अघोर: पद्मा।६।तत्पुरुष: अंबिका
अनंत: निवृत्ति:।१०।अनथ: प्रतिष्ठा।१२।जेनाश्रित: विद्या।१४
अचिंत्य: शांता।१६।शांत्रिशिखो खर: उमा।१८।तीव्र: गंगा।२०।
मणिवाह: सरस्वती।२२।अंबुवाह: कमला।२४।तेजोधीश: पा
र्वती।२६।विद्यानागीश्वर: चित्रा।२८।चतुर्विधेश्वर: सुकमला।
उमागंगेश्वर: मन्मथा।३२।सूक्ष्मेश्वर: श्रिया।३४।श्रीकंठ: ल
या।३६।अनंत: सती।३८।त्र्यंकत्रे: मेखला।४०।पिंगल: यशोव
ती।४२।स्वाध्याख्य: हंसानंदा।४४।परदिव्योघ: वाम:।४६।मा
रदिव्योघ: ज्येष्ठा।४८।पीठौघ: रौद्री।५०।सर्वेश्वर: सर्वमेयी।५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एते आधारस्वमयमणिपूरे षट्‌दले चतुष्कादिक्रमेण पूज्याः तदु
क्तं पद्मवाहिन्यां । चतुष्कं च चतुष्कं च षट्कं भूयश्चतुष्ककं । पं
चकं त्रिकमित्येवं भिन्नाजलमरीचयइति । तत्रांतरे द्विपंचा
शद्दले संचिंत्य ते च पूजनमुक्तं । एवमग्रेपि । अथ ते जरेत्वम
यः । परापरः चंडीश्वरी २ । परमः चतुष्पती ४ । तत्परः गुह्यका
ली ६ । अपरः संवर्ता ८ । चिदानंदः नीलकुब्जा १० । अघोरः गं ॥२६॥
धा १२ । सामरसः रसा १४ । ललितः स्मया १६ । स्वस्वाभः स्वपत्री १८
॥२६॥ भूतेश्वरः शाब्दा २० आनंदः डाकिनी २२ आलस्यः रत्ना डाकिनी २४
प्रभानंदः चक्रडाकिनी २६ योगानंदः पद्मडाकिनी २८ अतीतः
कुब्जडाकिनी ३० प्रस्वादः प्रचंडडाकिनी ३२ । योगेश्वरः चं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

डा३४ पीठेश्वरः कोशाला ३६ कुलकोलेश्वरः पावनी ३८ कुक्षेश्वरः
समया ४० श्रीकंठः कामा ४२ अनंतः रेवती ४४ शंकरः ज्वाला ४६
पिंगलः कराला ४८ सादाख्यः कुब्जीका ५० करालत्रिगुरुः परा ५२
सिद्धगुरुः शांसतीता ५४ रलगुरुः शांता ५६ शिवगुरुः विद्या ५८
मेलगुरुः प्रतिष्ठा ६० समयगुरुः निवृत्तिः ६२ एते स्वाधिष्ठाने
दशादले पश्चिमादि नवदलेषु षट् षट् क्रमेण दशमदले ए
कं एजायेत्र।। यद्यवाह्निन्यां तु। पंचके पंचकं षट्कं चतुष्कं पंचकं
पुनः।। षट्कमित्थं क्रमात्स्थितास्तेऽजसक्रमस्त्वमय इति। षट्कोणे एजनम
त्के। अथवाय्यंय्यमरीचयः। स्वगेश्वरः भडारकूर्मठ आधारा ४ मेषः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शोकाद्६ मीनः मल्लिका८ सानः विमला१० महानंदः शार्वरी१२ तीव्रः ली
ला१४ प्रियः मुकुंदा१६ कालिकाः मेनकि१८ डामरः डाकिनी२० रामः
राकिनी२२ लामः लाकिनी२४ कामः काकिनी२६ सामयः साकिनी२८
हामरः हाकिनी३० आधारेश्वरः राका३२ चक्रीशो बिंदुः३४ कुररः कु
ला३६ समयश्रीश्वरः कुब्जीका३८ हृदीशः कामकला४० शिरसः कु
२७॥ लदीपिका४२ शिखेशः बर्बरी४४ वर्मिमी बहुरूपा४६ अक्षेशः
महत्तरी४८ परमगुरुः मंगला५० पराधिगुरुः कौसटा५२ रुद्रगु
रुः रामा५४ एते अनाहते द्वादशदले पश्चिमादि एज्याः त्रितीयष गुरु॥
ष्ठ नवदले षट्षट् अन्येषु चतुष्कं चतुष्कं अथवा प्रथमांसयो
षट्कमष्टमं अन्ये चतुष्कं चतुष्कं पर्यवाहिन्यां तु॥ चतुष्कं पंच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ं षट्कं चतुष्कं पंचकं त्रिकं ॥ इति क्रमेण भिन्ना स्पुर्वार्यवीयामरीच
यइति ॥ षट्कोणेषु जनमुक्तं । अथ नाभसाः हृदयः कौलिनी २ ध
रः कांता ४ भोगः विश्वेश्वरी ६ भयः योगिनी ८ पहः ब्रह्मसारा १०
शावः शावरी १२ भैरवः कालिका १४ रसज्ञष्टः चांडाली १६ मोहः
अघोरेसी १८ मनोभयः हेला २० खेकः संहारकारा २२ सानगुह्यः कु
ब्जिका २४ स्वरः डाकिनी २६ ज्वलनः राकिनी २८ महाकुलः लाकि
नी ३० प्रियोलः काकिनी ३२ तेजः शाकिनी ३४ मरुः हाकिनी ३६
वायुः पापघ्नी ३८ कुलः सिंहा ४० संहारः कुलांबिका ४२ विश्वंभ
रः कामा ४४ कौरिलः कूर्ममाता ४६ गालवः कंकाली ४८ व्योमः व्यो
मा ५० श्वसनः नादा ५२ खेचरः महादेवी ५४ बाकुलः महत्तरी ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीत: कुंडलिनी ५८ कुलातीत: कुलेसी ६० अज: अधिका ६२ मनन: दि
॥२८॥ पिका ६४ ईशा: रेचिका ६६ शिख: मोचिका ६८ परम: परा ७० परे: चित् ७२
एते विभुद्वैषोडशदले आद्यंतयो: अष्टक मष्टकं अनेषु चतुष्कं
चतुष्कं ॥ पद्यवाह्न्यांतु ॥ षट्कं षट्कं पुन: षट्कं षट्कं षट्कं पुन अंत
लदूतिक्रमात्समुद्दिष्टानाभसादिव्य रश्मय इति षद्रोणोऽज
नमुक्तं ॥ अथमानस रश्मय: परापरा २ अपरापरा ४ चित् चि
त्परा ६ महामायापरा ८ इच्छा इच्छापरा १० सृष्टि: सृष्टिपरा १२
स्थिति: स्थितिपरा १४ निरोध: निरोधपरा १६ मुक्ति: मुक्तिप
रा १८ ज्ञान: ज्ञानपरा २० सत: सती २२ असत् असतीपरा २४ ॥२८॥
सदसत सदसदतीता २६ क्रिया क्रियापरा २८ आत्मा आत्माप
रा ३० इंद्रियाश्रय: इंद्रियाश्रयपरा ३२ गोचर: गोचरपरा ३४ लोक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुख्यः कलोमुख्यापरा ४६ वेदवतु वेदवतुपरा ४८ सवितृ सवितृपरा ५०
कुंडलिनी कुंडलिपरा ५२ सोषुम्नः सोषुम्नापरा ५४ प्राणोसूत्रः प्राणसू
त्रापरा ५६ स्पंदः स्पंदापरा ५८ मातृका मातृकापरा ५० स्वरोद्भवः स्व
रोद्भवीपरा ५२ वर्णजः वर्णजापरा ५४ शब्दजः शब्दजापरा ५६ मंत्रवि
ग्रहः मंत्रविग्रहापरा ५८ एते आज्ञाचक्रे द्विदले एतस्याः चतुष्कं चतुष्
यं वामदले। चतुष्कं चतुष्टयं दक्षिणदले। पद्यवाहिन्यां तु॥ चतुष्कं
पंचकं चैव चतुष्कं सप्तकं पुनः॥ चतुष्कं सप्तमं चेति क्रमात्मान सर
रमयइति षड्कोणे एतन्न मुक्तं॥ इति पद्यवाहिन्यां घ्रस्तूर श्मिनामा
नि मिथुनमालायां तु एतेषां नामांतराण्युक्तानि॥ यथा॥ त्रिपुर
सुंदरी त्रिपुरसुंदरः २ हृदयदेवी हृदयदेवः ४ शिरोदेवी शिरोदेवः ६
शिखादेवी शिखादेवः ८ कवचदेवी कवचदेवः १० नेत्रदेवी नेत्रदेवः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्त्रदेवी अस्त्रदेवः १४ कामेश्वरी कामेश्वरः १६ भगमालिनी भगमा
ली १८ नित्यक्लिन्ना नित्यक्लिन्नः २० भेरुंडा भेरुंडः २२ वह्निवासिनी वह्नि
वासी २४ महावज्रेश्वरी महावज्रेश्वरः २६ शिवदूति शिवदूतः २८ त्व
रिता त्वरितः ३० कुलसुंदरी कुलसुंदरः ३२ नित्या नित्यः ३४ नीलपता
का नीलपताकः ३६ विजया विजयः ३८ सर्वमंगला सर्वमंगलः ४० ज्वा
लामालिनी ज्वालामाली ४२ चित्रा चित्रः ४४ महानित्या महानित्यः ४६
॥२९॥ परमेश्वरी परमेश्वरः ४८ मित्रेशमयी मित्रेशमयः ५० षष्ठीशमयी
षष्ठीशमयः ५२ उड्डीशमयी उड्डीशमयः ५४ चर्यानाथमयी चर्या
नाथमयः ५६ एते पार्थिवरत्नमयाः ॥ अथ पाषाणरत्नमयः । लोपामुद्रा ॥२९॥
मयी लोपामुद्रामयः २ अगस्त्यमयी अगस्त्यमयः ४ कालतापन
मयी कालतापनमयः ६ धर्माचार्यमयी धर्माचार्यमयः ८ मुक्तके
शेश्वरमयी मुक्तकेशेश्वरमयः १० दीपकलानाथमयी दीपकला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाथमयः १२ विष्णुदेवमयी विष्णुदेवमयः १६ प्रभाकरदेवमयी प्रभाकर
देवमयः १६ तेजोदेवमयी तेजोदेवमयः १८ मनोदेवमयी मनोदेवमयः २०
कल्याणदेवमयी कल्याणदेवमयः २२ रत्नदेवमयी रत्नदेवमयः २४
वासुदेवमयी वासुदेवमयः २६ रामानंदमयी रामानंदमयः २८ अ
णिमासिद्धि अणिमासिद्ध ३० लघिमासिद्धि लघिमासिद्ध ३२ म
हिमासिद्धि महिमासिद्ध ३४ ईशत्वसिद्धि ईशत्वसिद्ध ३६ वशित्व
सिद्धि वसित्वसिद्ध ३८ प्राकाम्यसिद्धि प्राकाम्यसिद्ध ४० भुक्तिसि
द्धि भुक्तिसिद्ध ४२ इच्छासिद्धि इच्छासिद्ध ४४ प्राप्तिसिद्धि प्राप्तिसि
द्ध ४६ सर्वकामसिद्धि सर्वकामसिद्ध ४८ ब्राह्मी ब्रह्मा ५० माहेश्वरी
माहेश्वरः ५२ इति जलरत्नमयः ॥ अथ तैजसरत्नमयः ॥ कौमारी कु
मारः २ वैष्णवी विष्णुः ४ वाराही वाराहः ६ माहेंद्री महेंद्रः ८ चामुंडा चा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुउ८१०महालक्ष्मीमहालक्ष्म:१२सर्वसंक्षोभिणीसर्वसंक्षोभण:१४
सर्वविद्रावणीसर्वविद्रावण:१६सर्वाकर्षणीसर्वाकर्षण:१८सर्व
वशीकरणीसर्ववशीकरण:२०सर्वोन्मादिनीसर्वोन्मादन:२२
सर्वमहांकुशासर्वमहांकुश:२४सर्वखेचरीसर्वखेचर:२६सर्वबी
जासर्वबीज:२८सर्वयोनि:सर्वयोनि:३०सर्वत्रिखंडासर्वत्रिखंड:३२
त्रैलोक्यमोहनचक्रस्वामिनीत्रैलोक्यमोहनचक्रस्वामी३४प्रक
॥३०॥ टयोगिनीप्रकटयोगी३६कामाकर्षणीकामाकर्षण:३८बुध्या
कर्षणीबुध्याकर्षण:४०अहंकाराकर्षणीअहंकाराकर्षण:४२ ॥३०॥
शब्दाकर्षणीशब्दाकर्षण:४४स्पर्शाकर्षणीस्पर्शाकर्षण:४६
रूपाकर्षणीरूपाकर्षण:४८रसाकर्षणीरसाकर्षण:५०गंधाक
र्षणीगंधाकर्षण:५२चित्ताकर्षणीचित्ताकर्षण:५४धैर्याकर्षणी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

धैर्याकर्षणः ५६ स्मृत्याकर्षणी स्मृत्याकर्षणः ५८ नामाकर्षणी नामाक
र्षणः ६० बीजाकर्षणी बीजाकर्षणः ६२ अथवायन्यमरीचयः ॥ आ
त्माकर्षणी आत्माकर्षणः २ अमृताकर्षणी अमृताकर्षणः ४ शरी
राकर्षणी शरीराकर्षणः ६ सर्वाशापरिपूरकचक्रस्वामिनी सर्वा
शापरिपूरकचक्रस्वामी ८ गुप्तयोगिनी गुप्तयोगी १० अनंगकुसु
मा अनंगकुसुमः १२ अनंगमेखला अनंगमेखलः १४ अनंगम
दना अनंगमदनः १६ अनंगमदनातुरः अनंगमदनातुरः १८ अ
नंगरेखा अनंगरेखः २० अनंगवेगिनी अनंगवेगः २२ अनंगां
कुशा अनंगांकुशः २४ अनंगमालिनी अनंगमाली २६ सर्व
संक्षोभणचक्रस्वामिनी सर्वसंक्षोभणचक्रस्वामी २८ गुप्ततर
रयोगिनी गुप्ततरयोगी ३० सर्वसंक्षोभिणी सर्वसंक्षोभः ३२ स

श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वविद्राविणी सर्वविद्रावणः ३४ सर्वाकर्षिणी सर्वाकर्षणः ३६ सर्वा
ल्हादिनी सर्वाल्हादी ३८ सर्वसंमोहिनी सर्वसंमोहः ४० सर्वस्तं
भिणी सर्वस्तंभः ४२ सर्वजृंभिणी सर्वजृंभणः ४४ सर्ववशंकरी
सर्ववशंकरः ४६ सर्वरंजनी सर्वरंजनः ४८ सर्वोन्मादिनी सर्वो
न्मादनः ५० सर्वार्थसाधनी सर्वार्थसाधनः ५२ सर्वसंपत्तिह
रणी सर्वसंपत्तिहरणः ५४॥ अथ नाभसाः॥ सर्वमंत्रमयी
सर्वमंत्रमयः २ सर्वद्वंद्वक्षयंकरी सर्वद्वंद्वक्षयंकरः ४ सर्वसौ
भाग्यदायकचक्रस्वामिनी सर्वसौभाग्यचैक्रदायकचक्र
॥३१॥ स्वामी ६ संप्रदायोगिनी संप्रदायोगी ८ सर्वसिद्धिप्रदा सर्वसि ॥३१॥
द्धिप्रदः १० सर्वसंपत्प्रदा सर्वसंपत्प्रदः १२ सर्वप्रियंकरी सर्व
प्रियंकरः १४ सर्वमंगलकारिणी सर्वमंगलकारी १६ सर्वकाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१

प्रदासर्वकामप्रदः १८ सर्वदुखविमोचनीसर्वदुखविमोचनः २०
सर्वमृत्युप्रशमनीसर्वमृत्युप्रशमनः २२ सर्वविघ्ननिवारिणी
सर्वविघ्ननिवारणः २४ सर्वांगसुंदरीसर्वांगसुंदरः २६ सर्वसौ
भाग्यदायिनीसर्वसौभाग्यदायी २८ सर्वार्थसाधकचक्रस्वा
मिनीसर्वार्थसाधकचक्रस्वामी ३० कुलकौलयोगिनीकुल
कौलयोगी ३२ सर्वज्ञासर्वज्ञः ३४ सर्वशान्तिः सर्वशान्तः ३६ सर्वै
श्वर्यप्रदासर्वैश्वर्यप्रदः ३८ सर्वज्ञानमयीसर्वज्ञानमयः ४०
सर्वव्याधिविनाशिनीसर्वव्याधिविनाशनः ४२ सर्वाधारस्व
रूपासर्वाधारस्वरूपः ४४ सर्वपापहरासर्वपापहरः ४६ स
र्वानंदमयीसर्वानंदमयः ४८ सर्वरक्षास्वरूपिणीसर्वरक्षा
स्वरूपी ५० सर्वेप्सितफलप्रदासर्वेप्सितफलप्रदः ५२ सर्वर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शाकरचक्रस्वामिनी सर्वरसाकरचक्रस्वामी ५६ निगर्भयोगि
नी निगर्भयोगी ५७ वशिनी वशी ५८ कामेश्वरी कामेश्वरः ६०
मोदिनी मोदी ६२ विमला विमलः ६४ अरुणा अरुणः ६६ जयिनी जे
यी ६८ सर्वेश्वरी सर्वेश्वरः ७० कौलिनी कौली ७२ अथ मानसाः ॥
॥३२॥ सर्वरोगहरचक्रस्वामिनी सर्वरोगहरचक्रस्वामी २ रहस्य
योगिनी रहस्ययोगी ४ बाणिनी बाणी ६ चापिनी चापी ८ पाशि
नी पाशी १० अंकुशिनी अंकुशी १२ महाकामेश्वरी महाका
मेश्वरः १४ महावज्रेश्वरी महावज्रेश्वरः १६ महाभगमालि
नी महाभगमाली १८ महात्रिपुरसुंदरी महात्रिपुरसुंदरः २० ॥३२॥
सर्वसिद्धिप्रदचक्रस्वामिनी सर्वसिद्धिप्रदचक्रस्वामी २२ अति
रहस्ययोगिनी अतिरहस्ययोगी २४ श्रीमहारिका श्रीमहार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नः २८ सर्वानंदमयचक्रस्वामिनी सर्वानंदमयचक्रस्वामी ३० पराप
ररहस्ययोगिनी परापररहस्ययोगी ३२ त्रिपुरा त्रिपुरः ३४ त्रिपुरे
श्वरी त्रिपुरेश्वरः ३४ त्रिपुरसुंदरी त्रिपुरसुंदरः ३६ त्रिपुरवासि
नी त्रिपुरवासी ३८ त्रिपुराश्रीः त्रिपुराश्री ४० त्रिपुरमालिनी त्रिपु
रमाली ४२ त्रिपुरासिद्धा त्रिपुरासिद्धः ४४ त्रिपुरांबा त्रिपुराबः ४६
महात्रिपुरसुंदरी महात्रिपुरसुंदरः ४८ महामहामाहेश्वरी महा
महामाहेश्वरः ५० महामहाराज्ञी महामहाराज्ञा ५२ महामहाशक्तिः महा
शक्तेः ५४ महामहागुप्ता महामहागुप्तः ५६ महामहाज्ञप्ता महाज्ञप्तः ५८ म
हामहानंदा महानंदः ६० महास्पंदा महास्पंदः ६२ महामहाशया म
हाशयः ६४ इति मानसाः ॥ इति अनेन प्रकारेण ये मयूखास्ते
षामुपरि सहस्रारे तव पदांबुजं रक्तशुक्लात्मकं तयोर्मध्ये स्तु ॥

३२

श्रीमन्महाश्रीचक्रनगरसाम्राज्ञीरत्नश्रीपादुकांपूजयामिनमः॥
इतिब्रह्मरंध्रेदक्षिणभागे॥वामभागेतु॥श्रीमन्महाश्रीचक्रनगरसं
म्राट्प्रभुरत्नश्रीपादुकांपूजयामिनमइति॥एवंरश्मिक्रमंकुर्वन्
साधकोविजितेंद्रियः॥धनधान्यायुरारोग्यपांडित्यादिपदंव्र
जेत्॥एवंतुतच्चक्रदेवीनामंतर्योगोनिवेदितेतिफलश्रुतिः॥
यत्तुश्रीपारादिद्विद्विचक्रेअग्निसूर्यसोमायस्थानंतत्रा
ग्नेरष्टोत्तरशतकिरणाःक्षितावुदकेचसंतिकृताश्रोनिलेच
षोडशाधिकशतगभस्तयोभानोःएवंदिविमनसिचषट्
त्रिंशदधिकगभस्तयःसोमस्य।तदुक्तंभैरवयामले॥अष्टो
त्तरशतंवन्हेःषोडशोत्तरकंरवेः॥षट्त्रिंशदुत्तरंतेजःसोमस्य
परिकीर्त्तिताः इतिव्याख्यानं॥तदप्युक्तमेव।विक्षुपक्षेपिसम।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ड्यो

नं॥१४॥श्लोक॥शारज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां व
रत्रासत्राणस्फटिकगुटिकापुस्तककरां॥सकृन्न त्वा न त्वां
कथमपि सतां सन्निदधते मधुक्षीरद्राक्षामधुरिमधुरीणा
भणितयः॥१५॥अथ त्रिभिः श्लोकैर्वाग्भवोपासनोपयुक्तध्या
नादिकमुच्यते॥तत्र सात्विकं ध्यानमाद्येनाह॥शरज्ज्योत्स्नेति।
शरत्कालीनचंद्रिकारुचिरा शशिना युतं शशियुतं जटायाः
जूटो बंधः तन्मयं मुकुटं यस्यास्तां॥वरो वरमुद्रा त्रासत्राण
मभयमुद्रा स्फटिकगुटिका स्फटिकमाला पुस्तकं च क
रे यस्यास्तां त्वां सकृदेकवारमपि न नत्वा सतां सज्जनानां
भणितयो वाचः कथं सन्निदधते संनिहिता भवंति न कथ
मपीत्यर्थः। कीदृश्यो भणितयः मधुक्षीरद्राक्षामधुरिमधु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीणाः वधुवन्माक्षिकवत्क्षीरवत्स्वावर्त्तितदुग्धवत्द्राक्षावत्
म्रद्वीकावत्मधुरिमधुरीणाः माधुर्यधुर्वं हाइयर्थः॥ वि
क्षुपक्षे। एवंभूतां सरस्वतीमपित्वां पुनः सकृदेपि न नत्वास
तां भणितयः कथं संनिदधतइत्यर्थः॥१५॥ श्री॥ श्लोकः॥ क
वीद्राणां चेतःकमलवनबालातपरुचिंभजंते ये संतः कति
चिदरुणामेव भवती॥ विरिंचिप्रेयस्यास्तरलतरशृंगार
गि लहरीगभीराभिर्वाग्भिर्विदधति सतां रंजनममी॥१६॥
तत्रैव राजसंध्यानमाह॥ कवींद्राणामिति॥ ये संतः कति
चित्क्रियंतः अरुणामेव भवतीं भजंते। अमी संतः वाग्भिः ॥३४॥
सतां सज्जनहृदयानां रंजनं विदधति भवती कीदृशी क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वींद्राणां वर्णयितः श्रेष्ठानां चेतांस्येव कमलवनानि तत्र बालातपरुचिं
उद्यत्सूर्यकिरणाकारां तस्य कांतिं कामियर्थः॥ वाग्भिः कीदृशी
भिः विरिंचिप्रेयस्याः सरस्वत्याः तरलतरांदोलितायाः शृंगारल
हरी कामरसप्रवाहस्तद्वद्गंभीराभिर्गूढार्थप्रतिपादकाभिः त
थासरस्वत्याः कामोद्रेकोगूढस्तथागूढार्थाभिरित्यर्थः॥ यद्वाअ
मीसतां रंजनं सरस्वत्याश्च रंजनं विदधाति। तरुणतरां स्त्रीपुरुष
णां तरुणतरा समुद्भावा याः शृंगारलहरी शृंगाररसतरंगास्तै
र्गंभीराभिरित्यर्थः॥ विष्णुपक्षे। भवति त्वयि त्वदंके विद्यमानामं
लक्ष्मीं ये भजंत इत्यर्थः। कवींद्राणामिति आदि लक्ष्मीविशेषणं
शेषं समानं॥ ९६॥ श्लोकः॥ सावित्रीभिर्वाचां शशिमणिशिलाभं
गरुचिभिर्वशिन्याद्याभिस्त्वां सहजननिसंचिंतयति यः॥ स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्त्ता काव्यानां भवति महतां भंगिसुभगैर्वचोभिर्वाग्देवीवदनकमला

मोदमधुरैः ॥ २७ ॥ सवित्रीभिरिति । हे जननि वाचां सवित्रीभिर्मातृ

कास्मिकाभिः शशिमणिशिलाचंद्रकांतमणिपाषाणास्तस्य भंगः

भंज्यमानचंद्रकांतमणिरित्यर्थः । रूढभिहित इति न्यायात् ॥ त

द्रुचिः कांतिर्यासां ताभिः वशिन्याद्याभिः वशिनीकामेश्वरी

मोदिनी विमला अरुणा जयिनी सर्वेश्वरी कौलिनीभिः सह ये

त्वां संचिंतयति स महतां काव्यानां महाकाव्यानां कर्त्ता भवति ॥

कैर्वचोभिः कीदृशैर्भंगिसुभगैः नानाशब्दरचनावैदग्ध्यवि

शेषाभंगास्ताभिः सुभगैः शोभनैः वाग्देवीवदनकमलामो

दमधुरैः सरस्वतीमुखारविंदसौरभवन्मधुरैर्हृद्यैरित्यर्थः ॥

विद्युपक्षे ॥ वक्रा अस्या अस्ति जगदिति वशिनी रुक्मिणी त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाराभिः रुक्मिणी सत्यभामा नाग्नजिती सुनंदा मित्रविंदा सुलक्ष्म
णा जांबवती व सुशीलाभिः सहजननीति क्रियाविशेषणं देव
की सहितं यथा स्यात्तथेत्यर्थः ॥ तेन वसुदेव देवकी नंद गोप य
शोदा बलभद्र सुभद्रा गोप गोप्य इति द्वितीयावरणं प्राप्तं ॥ य
द्वा जननीवाचरति जननी विष्णुः आचरत्यर्थे क्विबंतात् कर्त्तरि क्वि
प् । तस्य संबोधने जननि इति प्रथमलिंगग्रहणं चेति नदीसं
ज्ञायां अंबार्थ नद्योर्ह्रस्व इति ह्रस्वः ॥ शेषं समानं ॥ १७ ॥ श्लोकः ॥
तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिर्दिवं सर्वामुर्वीम
रुणिमनिमग्नां स्मरति यः ॥ भवंत्यस्य त्रस्यद्वनहरिणशालीन
नयनाः सहोर्वश्या वश्याः कति कति न गीर्वाणगणिकाः १८ ॥
मध्यकूटोपेयुक्तं ध्यानादिकमाह ॥ तनुच्छायाभिरिति ॥

अरुणतरणीश्रीसरणिभिः बालादित्यकांतिवत्संभृताभिस्तत्स
दृशीभिरित्यर्थः ।तनुछायाभिः शरीरकांतिभिः करणभूताभिः ।
सर्वांदिवमाकाशं उर्वीं पृथ्वीं अरुणिमनिमग्नां लोहितकांति
कवलितां यः स्मरति ।अस्य कति कति गीर्वाणगणिकाः देववे
श्या सैउर्वश्या सह वश्या न भवंति अपितु भवंत्येवात्रस्यंतेऽवि
भ्यतो ये वनहरिणाः गृहहरिणा मां त्रासाभावात्तद्वत् चालि
तं क्षोभमानं नयनं यासां तादृश इत्यर्थः ॥ अनिमिषदृष्टीनां सुरांग
नानां कामरूपतया नयनचांचल्यमुपपन्नं विष्णुपक्षेप्येवं ॥३६॥
॥३६॥ ॥१८॥ श्लोकः ॥ मुखं बिंदुं कृत्वा कुचयुगमधस्तस्य तदधो हरार्धं
ध्यायेद्यो हरमहिषि ते मन्मथकलां ॥ स सद्यः संक्षोभं नयति व
निता इत्यति लघु त्रिलोकीमप्याशु भ्रमयति रविंदुस्तनयुगां ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामकलाध्यानमाह। मुखं बिंदुमिति। बिंदुमेकं ईकारात्मकं विषयवरूपं मुखं कृत्वा मुखतया ध्यात्वा तदधः कुचद्वयाद्धः ह रार्द्धं अधोमुखं त्रिकोणं योध्यायेत्। हे हर महिषि महेशाप लिते तव मन्मथकला क्लीं बीजस्य ईकाररूपस्वरूपं सवनितां संक्षोभं नयति इति फलं अति लघुः अतितुच्छं। अतएवाधिकं फलमाह। रवींदुस्तनयुगं यस्याः सा त्रिलोकीमपि आशु शीघ्रं भ्रमयति क्षोभयतीत्यर्थः। एतदेवोक्तं च तु शारयं बिंदुं संकल्प्य वक्त्रं तु तदधः स्यात् कुचद्वयं। तदधः सपरार्द्धं तु चिंतयेत्तदधोमुखमिति। तथा बिंदोस्तद्वक्त्रमारोपतदधो वायुयुग्मकं। तदधः कुचयुग्मं तु तदधो योनिमेवचेति। त्रिलोकीमपीत्यनेन तस्या अपि कामकलारूपतयास्तंभवति। तदुक्तं रुद्रयामले। नभोमहाबिंदुमुखी चंद्रसूर्यस्तनद्वया। सुमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुहार्द्धकलया शोभमाना महापदा ॥ पातालतलविन्यासा त्रिलोकी
यंतवांबिके ॥ कामराजकलारूपा जागर्त्ति सचराचरेति । अत्र हरा
र्द्धपदेनाधोमुखत्रिकोणात्मिका योनि रुच्यते ॥ हरो हकारस्तस्य
एवंभागे मध्ये अधोभागो योन्याकारस्तिष्ठति । अथवा हकारः शि
वेति वर्णद्वयं तस्याई शाकार वकारयोर्लोपादिकाराकारौ व्यत्यये
न संहितां प्राप्तो एकाररूपयोनिर्भवति । अथवा हरो रविशब्दस्त
दर्द्धं रेफवकारयोर्लोपात्संहितायां एइति रूपं । यद्वा हरो हंसः पदं
हकारसकारयोर्लोपाद्विंदु विसर्गाभ्यां बिंदुत्रयमवशिष्यते ॥ त
॥२७॥ त्रैवं योजना । हरार्द्धं अंतः इति स्वरूपं ध्यायेत् ॥ केन प्रकारेण बिं
दुहकारोपरि स्थं मुखं वर्तते तस्याधो विसर्गात्मकं बिंदुद्वयं कुच ॥२॥
युगं वर्तते तदधः मन्मथकलां योनिं ध्यायेदित्यनुषंग इति । एतल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामकलारूपमतिगोप्यं। तदुक्तं संकेतपद्धतौ। एतत्कामकलाव्याप्तं गुह्याद्गुह्यतरं महत्। नाशिष्याय प्रवक्तव्यं नाभक्ताय कदाचन॥ एतस्यैकाक्षरं मातुरुद्घाटनमसुरान्तमो॥ आच्छादनमिव तस्मान्नेतत्प्रकाशयेत्॥ लोभान्मोहाद्भगवोद्भावे दुष्याद्वा प्रकाशयेत्॥ सोचिरान्मृत्युमाप्नोति शस्त्रघातविषादिभिरिति। विष्णुपक्षे॥ बिंदुमनुस्वारं मुखं अनंगं स्तनद्वयं तस्यश्चात् हराई त्रिवस्याद्धं गमायामिकारं तस्य हराईस्याधः पश्चात् कुः पृथिवि लकारः चयुगपदेन रूपं प्रपोर्थयव जौ श्रैः पिडांये रं समक्षरैरिति। न्यायेन षट् तस्य युक्तं चतुष्टयं तेन चतुर्विंशति: लकारः चतुर्विंशति: ककारः ककारानंतरं लकारं योगात् अनेन प्रकारेण मन्मथबीजरूपां कलां मंत्रे करे न्यायोध्यायेत्॥ सर्वेनितांसंक्षोभं नयति यतिलघुहरो महेशः महिषोस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तितिमहिमयः तयोर्भावो हरमहिषितानि हरमहिषिते इति द्वितीयां
तं नयति प्रापयति शिवभावं यमभावं प्रापयति। तथा त्रिलोकिम
प्याशु भ्रमयति इत्यर्थः। यद्वा हरमहिषिनाचरतीति तिरर्वाद्विक्वः।
संबोधनं यद्वामुखं बिंदुमित्यादिध्यानक्रिमो न्वयः। मन्मथं कल
यतीति मन्मथकलः प्रद्युम्नपितुः। आमिति संबुद्धौ यद्वा वनितामि
यस्या विशेषणं मन्मथकलामिति कामकौशलमित्यर्थः। अथवा
मन्मथकलारासक्रीडादौ कामकौशलं यः ध्यायेत्। समाधिना स
माधिमेवाह। मुखं वक्त्रं बिंदुं कृत्वा बिंदुः सदृशां मुद्रितं कृत्वा तस्या
॥२८॥ धःकुचयुगे बिंदुमुद्रितं कृत्वा तदधो हरार्द्धमुपस्थं बिंदुमुद्रितं कृ
त्वेत्यर्थः। वायुधारणाकाले सर्वछिद्रमुद्रणं योगमार्गसिद्धिः। तदु ॥२८॥
क्तं त्रिपुरासारसमुच्चये अथ पार्ष्णि निरुद्धं बुनिर्णाध्वजमल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थितसव्यपादपाणिः। रुद्रकायशिरोपरोजतात्माविषयेभ्योविनि
वर्त्तितेंद्रियाश्च। काकीचंचुगत्रर्षैर्मुकुरदरदरिं दरविलासमी
रैरं गुणाभ्यामुभाभ्यां नरद्रिपुविवरेतर्जनीभ्यां च नेत्रे। नासारंध्रेमि
रुध्यास्थिरविमलमतिर्मनाभ्यामथास्यं लंब्याभिनाति गाढं कमल
जनिलयेस्थापयेन्मानसं स्वमिति। कं बुनि गुदध्वजोलिंगं नरारि
य पुः कर्णः हरमहिषिद्यादिष्वेवं वदेव व्याख्येयमिति॥१९॥ श्लोकः॥१७
किरंतीमंगेभ्यः किरणनिकुरंबामृतरसं हृदित्वामाधत्ते हिमकर
शिलामूर्तिमिव यः॥ ससर्पाणां दर्पं शमयति शकुंताधिप इव
ज्वरप्लुष्टं दृष्ट्या सुखयति सुधाधारशिरया॥२०॥ तृतीयं बीजसा
धनोपयुक्तं ध्यानमाह॥ किरंतीमिति। यः साधकस्त्वां हृदि आध
त्ते सः शकुंताधिप इव गरुड इव सर्पाणां दर्पं दृष्ट्या शमयति। ज्वर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ पुष्टं ऐरदंधं सुखयति त्वां कीदृशीं। अंगेभ्यः शरीरेभ्यः किरणनिकु
रंबस्तेजःसमूहः स एव यो अमृतरसः सुधाद्रवः तं किरंतीं। का
यं मिव। हिमकरशिलामिवेंदुकांतमणिमूर्तिमिव। एतेन श्वेतरू
पं ध्यानमुक्तं। किरंत्या। सुधाधारशिरया अमृतधारासंपातप्र
णालिकयेत्यर्थः॥ विद्युत्पक्षे। किरंतीमिति शिलामूर्तिविशेषणं।
॥२०॥ श्लोकः॥ तडिल्लेखातन्वीं तपनशशिवैश्वानरमयीं निषण्णां
षण्णामप्युपरि कमलानां तव कलां॥ महापद्माटव्यां मृदितमल
॥३१॥ मायेन मनसा महांतः पश्यंतो दधति परमाल्हादलहरीं॥२१॥ ॥३१॥
मुखबिंदुमित्यादिकामकलायाः स्थूलध्यानमुक्तं॥ इदानीं सूक्ष्मं
ध्यानमाह॥ तडिल्लेखेति। तव कलामूर्तिं महांतः सनकादयः म
हापद्माटव्यां सहस्रारे मनसा ध्यायंतः परमाल्हादलहरीं अति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्राधितसुखप्रवाहंदधतिधारयंतिं। क्लींद्रोनमनसा। स्फुदितम
लमायेनस्फुदितेमलमायेयेनमलंकामक्रोधादिमाया। अनादि
सिद्धाविद्या। कलांक्लीद्रवीं। तडिल्लेखावत्। विद्युल्लतावत्। न
वीं सूक्ष्मांतपनशशिवैश्वानरमयीं सूर्येंदुवह्निरूपबिंदुत्रय
वतीं षण्णांकमलानां आधारादिसंज्ञामुपरिसहस्रारेनिष
ण्णामुपविष्टामित्यर्थः। तदुक्तं कामादिमते। इति तेगदिताका
मकलायाबालभावना॥ एवमेवाधुनावक्ष्येभावनामांतरा
लिकां॥ मूलादिब्रह्मरंध्रांते स्फुरद्विद्युल्लतावत्तीं॥ ध्यायेत्कु
ण्डलिनीं देवीं तद्विद्याक्षररूपिणीं॥ षट्चक्रभेदिनीं देवीं तां
च बिंदुत्रयात्मिकां॥ तमेवाद्यकलारूपां चिंतयेत्सप्रकाननं॥
एवंभावनयाजंतुः परमानंदनिर्भरः॥ संसारसागरंधीमां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रगोपरीकुरुते शिवेति। विष्णुपक्षे पूर्ववत्॥२१॥ श्लोकः॥ भवानि
त्वद्दासे वितर मयि दृष्टिं सकरुणामिति स्तोतुं वांछन् कथयति
भवानि त्वमिति यः॥ तदैव त्वं तस्मै दिशसि निजसायुज्यपद
वीं मुकुंद ब्रह्मेंद्रस्फुट मुकुटनीराजितपदां॥२२॥ भवानीति।
हे भवानि मयि सकरुणां दृष्टिं वितर प्रयच्छ इति संपूर्णं स्तो
॥४०॥ तुं वांछन् भवानि त्वमिति एतावन्मात्रं यः कथयति। शेषभा
गं यावन्नोच्चरति। तदैव त्वं तस्मै निजसायुज्यपदवीं दिशसि
प्रयच्छसि। कीदृशीं मुकुंदो विष्णुः ब्रह्मा धाता इंद्रः पाकशा ॥४०॥
सनः एतेषां स्फुटं यन्मुकुटं तेन नीराजितं पदं यस्याः तामि
त्यर्थः। विष्णुपक्षे। हे मुकुंद मोक्षप्रद मयि सकरुणां दृष्टिं वि
तरेत्येकं वाक्यं॥ तथा भवान् इत्वं कंदर्पत्वमपि वितरातीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभक्तिविपरिणामेनापरंवाक्यंभवत्यस्मादितिभावोविष्णुः सएवअपर्णःप्रा
णोविद्यतेयस्यासोभवाणीविष्णुभक्तः तस्यभावोभवानित्वमित्येकमेववा
क्यं।यद्वामोहिनीरूपेणभवानीवआचरतीतिभवानीविष्णुःआचरक्वि
वेताकर्त्तरिक्विप्।तस्यसंबोधनंहेभवानिविष्णोप्रथमालिंगग्रहणंचेति
नदीसंज्ञायांअंबार्थनद्योर्ह्रस्वःइतिह्रस्वः।इतिस्तोतुंयोछन्भवानित्वमित्येता
वदेवयःकथयतितदैवत्वंतस्मैसायुज्यपदवींदिशसि।ब्रह्मेंद्रेत्यादि
सायुज्यपदवीविशेषणं॥२२॥श्लोकः॥त्वयाहृत्वावामंवपुरपरितृप्तेन
मनसाशरीरार्द्धंशंभोरपरमपिशंकेहृतमभूत्।यथाहित्वद्रूपंसकल
मरुणाभंत्रिनयनंकुचाभ्यामानम्रंकुटिलशशिचूडालमुकुटं॥२३॥
त्वयेतित्वयाशंभोःवामंवपुःहृत्वाअपरमपिदक्षिणंशरीरार्द्धंअपरितृ
प्तेनइच्छापूर्तिरहितेनमनसाअंतःकरणेनहृतमभूदितिशंकेतर्कयामि॥
तथाहितदेवप्रतिपादयति।त्वद्रूपंसकलंअरुणाभंरक्तवर्णंरवंत्व

दर्धमेवरक्तमासीत्। त्रिनयनं त्रिलोचनं एवं साईनयनमासीत्। कुचाभ्या
मानं म्रं एवमिक कुचेननं म्रमासीत्। कुटिलो वक्रः शशिचंद्रः आधेय
त्वेन चूडाया आधारत्वेन विद्यते यस्य तत् कुटिलशशिचूडालं च तन्मुकु
टं चेति तद्विद्यते यत्रेति कर्मधारयोत्तरं बहुव्रीहिः। एवं तवमुकुटमा
त्रमासीन्नशशियुतं। अथवा कुटिलशशिनो र्द्धमासीन्नतु संपूर्णं
कुटिलशशीति भावः। विष्णुपक्षे। मोहिनीरूपं रत्वा शंभोः वामं सुंद
रं वपुः कृत्वा अपरमपि शरीरार्द्धं गौरीरूपं हृतं मया दिति शंकेः। तद्रू
पमियादिना मोहिनी ध्यानमुक्तं ॥२३॥ श्लोकः ॥ जगत्स्तेधाता हरि
॥४१॥ रवति रुद्रः क्षपयते तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयति। स
दापूर्वः सर्वं तदिदमनुगृह्णाति च शिव स्तवाज्ञामालंब्य क्षणचलित ॥४१॥
योर्भ्रूलतिकयोः ॥२४॥ जगदिति। क्षणं चकितयोः चंचलयोः तवभ्रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लतिकयोराज्ञामालंब्य प्राप्य धाता ब्रह्मा जगत् संसारं सूते सृजति। हरिर्वि
ष्णुः अवति रक्षति। रुद्रः क्षपयते कारणरूपतां प्रापयति। यथा घटादेर्मृ
दादिरूपता एवं कारणात्मकं जगत्तिरस्कुर्वन्। स्वमपि वपुः शरीरं
ईशः स्थगयति तिरोदधे। सदापूर्वः यः शिवः सदाशिवः सर्वं तदिदं
अनुगृह्णाति स्वात्मनि बीजभावेन स्थापयति। पुनः सृष्टेरनुग्रहात्म
कं॥ त्वयं पंचविधं यस्य तं नुमः त्वां भवतं शिवमिति। विष्णुपक्षेप्येवं पं
चब्रह्मांतर्गतविष्णुमतैस्तात्व्यभिन्नत्वान्न काप्यनुपपत्तिः॥२४॥ भौ
कं॥ त्रयाणां देवानां त्रिगुणजनितानां त्रिभुवने भवेत्पूजा पूजा तव च
रणयोर्या विरचिता॥ तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे स्थि
ता ह्येते शश्वन्मुकुलितकरोत्तंसमुकुटाः॥२५॥ त्रयाणामिति॥ हे
परमशिवे तव चरणयोर्या विरचिता पूजा सा त्रिगुणजनितानां स
त्वरजस्तमोजनितानां त्रयाणां देवानां ब्रह्मविष्णुरुद्राणां पूजा भवेत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परशिवे इत्यत्र त्रिभुवन इति क्वचित्पाठः। तथा हि तदेव प्रतिपाद्यते। हि यत
स्तात्पादावुद्वहतीति त्वत्पादोद्वहनं यन्मणिपीठं तस्य निकटे त्वाभवत्सुनि
रंतरं एता स्थिताः कीदृशाः मुकुलितकरा एव उत्तंसाः ते मुकुटेषु येषां ते
तथेत्यर्थः। उक्तं च देवीपुराणे॥ विष्णुरज्जासहस्राणि शिवरज्जाशता
॥४२॥ नि च॥ अंबिकाचरणार्चायाः कलां नार्हन्ति षोडशीं॥ विष्णुपक्षे त्रया
णां ब्रह्मरुद्रेन्द्राणां परशिवे परमकल्याणनिमित्तं त्रयोऽपि समानं। य
द्यात त्वच्चरणयोर्या विरचिता सा त्रयाणामपि पूजा अपूजा भवेत्॥
ननु तर्हि त्वच्चरणयोरपि पूजा न तेषामित्यत आह॥ तथा हीति तथा
च राज्ञः पूजया भृत्यपूजावदुपपन्नमिदमिति॥२५॥ श्लोकः॥ विरं
चिः पंचत्वं व्रजति हरिराप्नोति विरतिं विनाशं कीनाशो भजति धन ॥४२॥
दो याति निधनं॥ वितंद्रा माहेंद्री विततिरपि संमीलति दृशां महासं
हारेस्मिन्विलसति सति त्वत्सतीरसौ॥२६॥ विरंचिरिति। हे सति प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिव्रजते अस्मिन्महासंहारे विरंचिः ब्रह्मा पंचत्वं मृतिं व्रजति। हरिः विष्णुः विर
तिं विनाशं प्राप्नोति। कीनाशो यमः विनाशं मरणं व्रजति। धनदः कुबेरः निध
नं प्राणवियोगं याति। माहेंद्री महेंद्रसंबंधी दृशां चक्षुषां विततिः परंपरा वितं
द्रा विगतनिद्रापि सम्मीलति। असौ त्वत्पतिः विहरति क्रीडति। तथा च तवे
वायं प्रभाव इति भावः। विष्णुपक्षे॥ सतीति सत्यमंतं तेनास्मिन्महासंहारे
सति हरिः सूर्यो विष्णुरेव नाविरतिं अंतर्द्धानं त्वं प्रतिपालकः। यस्यासौ शि
वः विहरति तथा च प्रलये स्वशरीरमपि तिरोधत्ते न भक्तस्य हरस्येति
स्वापेक्षया तव भक्तेः प्रतीवानुकंपेति भावः॥२६॥ श्लोकः॥ जपो जल्पो जल्पः
शिल्पं सकलमपि मुद्राविरचना गतिः प्रादक्षिण्यक्रमणमशनाद्याहुत
विधिः। प्रणामः संवेशः सुखमखिलमात्मार्पणधिया सपर्यापर्याय
यस्तव भवतु यन्मे विलसितं॥२७॥ जपो जल्प इति। यन्मे विलसितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र वसपर्यापर्यायः पूजापरनामधेयो भवतु। विलसितमेवाहजल्पः स्वछंदभाषणं जपो भवतु। सकलं शिल्पं हस्तव्यापारः मुद्राविरचनं भवतु। गतिः स्वेछागमनं तव प्रादक्षिण्यक्रमणं भवतु। अनादिभोजनादितवाहुतविधिः। होमकर्म भवतु। संवेशः शयनं प्रणामो भवतु। अखिलं सुखं निद्रादिजन्यं आत्मार्पणदृशा भवतु। इत्यर्थः॥

॥१५३॥ विक्षुपक्षेपि समानं॥२७॥ श्लोकः॥ सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं विपद्यंते विश्वे विधिशतमखाद्या दिविषदः॥ करालं यत्क्ष्वेडं कवलितवतः कालकलना न शंभोस्तन्मूलं तव जननि ताटंकमहिमा॥२८॥ सुधामपीति। प्रतिभयं शास्त्रादिभयं जरां वार्द्धकं मृत्युं मरणं च हरयेतादृशीमपि सुधामास्वाद्य विधि ॥१५३॥

शतमखाद्याः ब्रह्मेंद्राद्याः विश्वे सर्वे दिविषदो देवाः विपद्यंते म्रियंते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्पुनः करालं भयानकं क्ष्वेडं समुद्रमथनोद्भूतं विषं कवलितवतः भ
क्षितवतः शंभोर्न कालेन मृत्युना कलनं ग्रसनं कालस्य मृत्योः कल व
नं प्राप्तिवति न्मूलं तस्य कारणं हे जननि तव ताटंकमहिमा कर्णा
लंकरणप्रभावः। मूलमित्यत्र नूनमिति क्वचित्पाठः। विद्धुपक्षे॥
जननं जन्म विद्यते यस्यासौ जननी जन्मवान् तस्य भावो जननिता
जन्मैव तस्य टंकपाषाणदारुकलौहशलाका रूप इति संबोधनं।
यच्छंभोर्न कालकलना तत्तवैव महिमा मूलमित्यर्थः॥२८॥ श्लोकं॥
किरीटं वैरिंचं परिहर पुरः कैटभभिदः कठोरे कोटीरे स्खलसि
जहि जंभारिमुकुटं। प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते॥२९॥ किरीटमिति॥
वैरिंचं ब्रह्मसंबंधिनं किरीटं मुकुटं पुनः अग्रे परिहर सजा कैट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रभिदो विद्धोः कठोरे कठिने कोटीरे मुकुटे स्खलसि। जंभारिरिंद्रः त
स्य सुकुटं जहिसजा। जहासर्थकि हंते लोट्ट मध्यम पुरुषे कवचनं प्र
योगोयं। धातूनामनेकार्थत्वात्स्य हाहने धातोर्गमनार्थकतयाज
हिगमय अन्यतः प्रेरयेसर्थः। एतेषु ब्रह्मादिषु प्रणामेषु सत्सु प्रस
भं हठाद्भवनं स्वगृहमागतस्य शिवस्य अभ्युत्थाने सति तव प
रिजनानां सखीनां मुक्तिर्विजयते शोभत इत्यर्थः। विष्णुपक्षे।
तस्य तव अभ्युत्थाने त्रायनादुत्थानकाले अभियाभि इति व्याति
॥४८॥ रेकेण परिजनानां जयविजयादीनां मुक्तिर्विजयते। तव कीदृशा ॥४८॥
स्य भवस्य जगदुत्पत्तिहेतोः पुनः कीदृशस्य कैटभभिदः कठिन
श्वासोद्रकोटीरभ्रंकं दर्पकीरीटः। तस्मिन् भवस्य कठोरे कोटी
रे इति वान्वयः। यद्वा हतं गृहमागतस्य महेशस्येवाभ्युत्थानइत्यर्थः। ॥२९॥

॥श्लोक॥ चतुःषष्ट्यातंत्रैः सकलमभिसंधायभुवनंस्थितस्ततत्सि
द्धिप्रसवपरतंत्रः पशुपतिः॥ पुनस्त्वंनिर्बंधादखिलपुरुषार्थैक
घटनास्वतंत्रंतेतंत्रंक्षितितलमवातीतरदिदं॥३१॥ चतुःषष्ट्ये
ति॥ चतुःषष्ठिसंख्याकैःतंत्रैःशास्त्रैःसकलंभुवनंअभिसंधा
यसंचयित्वापशुपतिःशिवःस्थितःतत्तत्सिद्धिप्रसरणापर
तंत्रैरुपदेशकैःत्वंनिर्बधात्पुनःतेतवतंत्रंशास्त्रंक्षितितल
लंअवातीतरत्अवतारयामास। कीदृशंअखिलपुरुषा
र्थानांधर्मार्थकाममोक्षाणांएकघटनायांमुख्यप्रयोजनंसा
धनेस्वतंत्रमन्यानपेक्षमित्यर्थः॥ विशेषपक्षेएवं॥३१॥ श्लोक॥
शिवःशक्तिःकामःक्षितिरथरविःशीतकिरणः स्मरोहंसः
शक्रस्तदनुचपरामारहरयः॥ अमीहृल्लेखाभिस्तिसृभि

रवसानेषु घटितां भजंते वर्णास्ते जननि तव नामावयवतां॥३१॥लो
पामुद्राविद्यामाह॥शिवइति॥हे जननि अमी ते वर्णाः तव नामाव
यवतां त्वं मंत्रराज नए वतनाम तस्यावयवतां घटकतां भजंते॥
वर्णानेवाह॥शिवो हकारः शक्तिः सकारः कामः ककारः क्षितिर्ल
कारः अथ शब्दः एवं बीज व्यवच्छेद एवं कापर बीजो पक्रमा यार
वि हकारः शीतकिरणः सकारः स्मरः ककारः हंसो हकारः श
क्रो लकारः हरिर्लकारः कीदृशा वर्णाः अवसानेषु खंडत्रयांते
॥४५॥ षु तिसृभि हल्लेखाभिः भुवनेश्वरी बीजैः हल्लेखव जा गर्त्तिप्रा ॥४५॥
णशक्तिरियं परा॥हल्लेखा कथ्यते तस्मान्मायावाचिंस वैभ
वात्॥अनयारहिताः सर्वे निर्जवा मंत्रराजयः॥अतस्तु सर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्राणामियमुद्बोधिनीमतेति। स्वछंदसंग्रहवचनात्। घटिताः संबं
धाइत्यर्थः। विष्णुपक्षे जननीपार्वतीतन्नाम्नैकदेशो तामम्मीवर्णाश्रि
ंतेतैतबैववत्ससंबंधिनएववत्ससंबंधादेवामीषांसिद्धिप्रदात्वमि
तिभावः। वैदेहिबंधोरितिवत्सस्वत्वंहरिसंकर्षणाकमलापतिल
क्ष्मीपतिनाम्नोमाधववर्णो बीजत्रयनिर्माणादित्याशयः। यद्वाजन
नंकारणंसंबंधेनास्यास्तीतिजननीविष्णुस्तेनतद्रूपेणजननि
नागोपालाष्टादशाक्षरेणअमासहअमीवर्णास्तवअवयवतां
भजन्तेइत्यर्थः। गोपालाष्टादशाक्षरपंचदशीभ्यांसुंदरीगोपाल
मंत्रोद्धारादितिभावः। जननीतिएवोत्तरीत्यादिविष्णुसंबोधनं
वा॥३१॥ श्लोकः॥ स्मरंयोनिंलक्ष्मींत्रितयमिदमादौतवमनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निधाये केनिसेनिरवधिमहाभोगरसिका॥ जपंति त्वांचिंताम
णिगुणनिबद्धाक्षवलया त्रिवाग्रोनुकृतः सुरभिघृतधाराकु
तशातैः॥३९॥ कामराजविद्यामुद्धरति। स्मरमिति। स्मरंककका
रंयोनिमेकारं लक्ष्मीमीकारं इदं त्रितयं तवमनो मंत्रेए वोर्स्के
निधाय तत्र त्वाद्यास्वरत्रयं लोपइत्वा संस्थाप्य एके श्रेष्ठसाध
काः हे नित्ये त्वां जपंति। कीदृशाः निरवधिः अवसानशून्यो यो
महाभोगः हे हि मुष्मिक दुःखादुःसं भिन्नसुखसंततिस्तदिसि
॥४६॥ कास्तदिच्छावंतः चिंतामणिः मातृकातद्रूपोयो गुणास्तंतुस्त
त्रनिबद्धोक्षरूपो इकारक्षकाररूपो वलयः अनुलोमप्रति ॥४६॥
लोमतयावलयाकारो येस्ते। यद्वा चिंतामणेगुणो यस्यासो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिंतामणिगुणस्तच्चरणकमलं तत्रनिबद्धानि अक्षवलयानींद्रियस
म्हानि येस्ते श्रीचायोषित्शिवशक्तिरूपकामीश्वरवामीश्वरी
संमेलनजातवह्नौ सुरभिघृतधाराकुतशातैः गोघृतधा
राकुतिशातैः जुहंतः होमं संपादयंत। आर्षत्वान्नुमः जुहुस्तुकृत
स्य अंतर्मध्येयत्सुरभिघृतधाराकुतिशातैः शिवाग्नौ महाभोग
रसिकाः एणाहुति रसिका इति वार्थः। अत्रैवाथर्वणवेदे सौभा
ग्यकांडे कामो योनिः कमलावज्रपाणिर्गुहा हसा मातरिश्वाभ्र
मिंद्रः। पुनर्गुहा सकमला मायये वा विश्वमातादिविद्यते। ऋ
ग्वेदेपि। इंद्रो मायाभिः पुरुरूप ईयत इति इंद्रः परमैश्वर्ययु
क्तो लकारः मायाभिः हल्लेखाभिः बहुरूप ईयते। तथाहि। हृ
ल्लेखायाः पंचधा षोडा चतुर्धा विभागास्त्रिधा भवंति। तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हकार रेफ ईकार बिंदु तत्सम दृष्टि रिति पंचधा विभागेन वाग्भवो
त्पत्तिः। हकारः रेफः बिंदुत्रयं तत्सम दृष्टि रिति षोढा विभागेन काम
राजो त्पत्तिः। हकारः रेफ ईकारः बिंदु रितिच तुर्धा विभागेन शक्ति
कूटोत्पत्तिः। एतस्या विद्यायाः पंचदशाक्षरीत्वं मनसोल्लासे॥
दशपंचकर्मे देन प्रपंचस्य विलासिनः। स्वाक्षिणी चाक्षरी य
स्मात्तस्मात्पंच दशाक्षरी॥ जायते वर्द्धते अस्ति परिणमति वि
नश्यतीति पंचदशाः। विष्णुपक्षे। स्मरं क्लीं योनिं ह्रीं लक्ष्मीं श्रीं
११८॥ तव मनो सुंदरी त्रिपाल मंत्रे वे परीत्ये नाष्टाक्षरे वा तेन राजरा
जेश्वर विंशार्णः स्मरामित्यनुवादः। मनो की दृशी नित्ये त्रिशा ॥११८॥
ग्रो च्चो भना ग्रौ शेषं समानं॥ श्लो॥ शरीर त्वं शंभोः श
शि मिहिर वक्षोरु हयुगं तवात्मानं मन्ये भगवति नवात्मान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनघं॥अतः शेषः शेषीययमुभयसाधारणतया स्थितः संबंधो
वां समरसपरानंदपरयोः॥श्रीशरीरमिति॥हे भगवति त्वं शं
भोः शरीरं कीदृशं शशिमिहिरौ चंद्रसूर्यौ स्तनौ यत्र तत्तथा॥
तदुक्तं चंद्रसूर्यौ स्तनौ देव्यास्तावेव नयने स्मृते॥उभौ ताटंकयुग
लं मित्येषा वैदिकी श्रुतिरिति॥नवात्मानं नवात्मानं नवव्यूहात्म
कं भैरवं स्वरूपं मन्ये॥व्यूहाश्च॥कालव्यूहः कुलव्यूहो नामव्यू
हस्तथैव च॥ज्ञानव्यूहस्तथा चित्तव्यूहस्तस्मादनंतरं॥नाद
व्यूहस्तथा विंदुव्यूहस्तस्मादनंतरं॥आत्मव्यूहस्तथा जीवव्यू
हस्यादिति तेन वा॥नवव्यूहात्मको देवः परानंदः परात्मकः॥न
वात्मा भैरवो देवो भुक्तिमुक्तिप्रदायकः॥परानंदा परा शक्ति
श्चिद्रूपानंदभैरवी॥तयोर्यदा सामरस्यं जगत्संपद्यते तदेति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रकालव्यूहो निमेषादिकल्पांतावच्छिन्नसमुदायः। कुलव्यूहो नी
लादिरूपभेदः नामव्यूहः संज्ञासमुदायः ज्ञानव्यूहो विज्ञानस्कं
धः। भोगव्यूहो निर्विकल्पकसविकल्पकसमुदायः। चित्तव्यू
हो अहंकारचित्तबुद्धिमहन्मनः समुदायः। नादव्यूहः परापश्यं
॥४८॥ ती मध्यमा वैखरीरूपः। बिंदुव्यूहः अनुस्वाररूपैकबिंदुविस
र्गरूपबिंदुद्वयात्मकः। आत्मव्यूहः आत्मांतरात्मापरमात्माज्ञा ॥४८॥
नात्मरूपः। जीवव्यूहः मनुष्यपशुपक्षिसरीसृपादिरूपः। अ
तो हेतोः शेषः शेषीति संबंधः गुणप्रधानभावः वा युवयोः स्वा
त्य धारणतयातुलैतया स्थितः। कीदृशयोः समरसेनैकात्म्येन
यः परानंदः उल्लसन्निरतिशयस्वरूपयोः तदधीनयोः स्तन्निष्ठयो
र्वा नवात्मनमित्यत्र भवात्मानमित्यपि क्वचित्पाठः। तत्र भवः शिवः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्णुपक्षे॥ शंभोः शरीरं त्वमिति मंस्ये॥ न वात्मानं एवं वैत्कं न वब्यूह रूपं त
व आत्मानं भगवति शिवे मंस्ये। वांयुवयोः विष्णुशिवयोरित्यर्थः॥ ३५॥
श्लोकः॥ मनस्त्वं व्योमस्त्वं मरुदसि मरुत्सारथिरसि त्वमापस्त्वं भूमि
स्त्वयि परिणतायां न हि परं॥ त्वमेव स्वात्मानं परिणमयितुं विश्ववपु
षा चिदानंदाकारं शिवयुवतिभावेन बिभृषे॥ ३६॥ मनस्त्वमिति॥ हे शि
वयुवति त्वं मनः अंतःकरणं असि व्योमाकाशः मरुद्वायुस्त्वमसि
मरुत्सारथिरग्निस्त्वमसि। आपो जलं भूमिः पृथिवी त्वयि परिणता
यां सत्यां परं भिन्नं कार्यं नास्ति। त्वमेव भावेन लीलाविशेषेण चिदा
नंदाकारं आत्मानं विश्ववपुषा जगद्रूपेण बिभृषे॥ किमर्थं परि
णमयितुं परिणामं प्रापयितुं॥ तदुक्तं चतुःशत्यां॥ त्रिपुरा परमा श
क्तिराद्या जाता महेश्वरी॥ स्थूल सूक्ष्म प्रभावेन त्रैलोक्योत्पत्तिमा
तृकाः॥ कवलीकृत निःशेष तत्त्व ग्राम स्वरूपिणी॥ यस्यां परिण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तायांतु न किंचित्परमिष्यत इति। इति विद्धुपक्षे॥ कार्यकारणयोरभे
दान्मनो रूपं कार्यमेव॥ एवमग्रेपि॥ ननु मन प्रभृती नामन्यदेव
कारणमस्तीति अत आह॥ त्वदीयादि॥ तु अयि परिणातायां आं इ
ति पदछेदः। अयि संबोधने। परिणतं यन्मनो व्योमादि तत्सर्वं
तदर्थं परमन्यकारणं नहि॥ आं स्मरणे तव कथं तद्रूपत्वमिय
त आह। शिवयुवतिभावेन शिवयुवतिर्माया शिव कल्याणस्व
॥४९॥ रूपेति संबोधनं॥ युवतिमायेति वा तस्याभावेन प्रभावेन मा
यिकमेवेदं न तात्विकमित्यर्थः। शिवमहिषीति पाठे संज्ञायां रु
स्वः। कालिदासवत्॥ वैदेहि बंधो हृदयं विददव इति वच्चेति बोध्यं॥
॥३५॥ श्लोकः॥ तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं परं
शंभुं वंदे परिमिलितपार्श्वं परचिता॥ यमाराध्यं भक्त्या रविशशि ॥४९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिशुचीनामविषयेनिरालोकेलोकेनिवसतिहिभालोकभवने॥२५॥
अथमानसादिषडुन्वयशांभवानांमुख्यभूतौदेवदेव्यौप्रतिचक्रे
षड्भिः श्लोकैस्तौति॥ तवाज्ञेति। तवाज्ञाचक्रस्थं त्वदधिष्ठितभ्रूमध्य
स्थं तपनः सूर्यः शशी चंद्रः तयोः कोटिसंख्याकैः कांतिधरं परं
शंभुं परशंभुनाथाख्यं परचिता परचिदंबया परिमिलितपा
र्श्वं परिष्वक्तवामभागं यं शंभुं शरण्या आराध्यन् एजयन् लोको
भक्तजनः भालोकभवने रविशशिलोकगृहे हि निश्चितं निवसति॥
कीदृशे निरालोके प्रकाशकालोकांतरभूते स्वप्रकाशरूपे अर्थः॥
तथाच श्रुतिः॥ न चेत तत्र सूर्यो न विभाति चंद्रमा नेमा विद्युतो भां
ति कुत एव वह्निः॥ तमेव भांतं सर्वं तस्य भासा सर्वमिदं विभाती
ति। अत्र कर्णिकायां॥ परशंभुनाथश्रीपादुकां पूजयामि॥पर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिदंबा श्रीपादुकां पूजयामि। इति संपूज्य। चतुःषष्टिदलेषु पूर्वोक्तंच
तुःषष्टि रश्मयः। नाथे श्रीपादुका मंबा पादुकां पूजयामि। इत्येते मं
त्रैः पूजनीया॥ एवमन्येच चक्रेष्वपि क्रमः। विष्णुपक्षे प्येवं॥ तत्र यदा
॥५०॥ ज्ञाचक्रमनुशासनसमर्थः। तत्रस्थं तदाज्ञापरिपालकमिति वा
र्थः॥२५॥ श्लोकः॥ विशुद्धौ ते शुद्धस्फटिकविशदं व्योमजनकं शिवं
सेवे देवीमपि शिवसमानव्यसनिनीं॥ ययोः कांत्या यांत्याः शशिकि
रणसारूप्यसरणिं विधूतांतर्ध्वांता विलसति चकोरीव जगती॥२६॥ ॥५०॥
क्रमप्राप्तमनाहतसरसिजमुख्य देव देव्यौ स्तौति॥ विशुद्धाविति॥
तेतवाधिष्ठाने भूते विशुद्धौ कंठस्थषोडशदलचक्रे स्फटिकवद्विशा
दं श्वेतं व्योमजनकं गगनकारणं शिवं व्योमेश्वरनाथनामा
नं देवीमपि व्योमेश्वरीमपि वंदे॥ कीदृशीं शिवेन समानं व्यस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्या त्यर्थः।मौर्वीमधुकरमयीभ्रमरमयीमधुकराणामाकर्णकाले
डस्थैर्यमनेनद्योतते।विशिखाबाणाःपंचैवननवधिकाःवसं
तःऋतुःकदाचित्कःसामंतःसहायःमलयमरुत्दक्षिणानिलः
मंदगमनःआयोधनरथःयुद्धसाधनोरथःस्वेयमप्येकःद्वि
तीयचेतनसहायरहितःअनंगःशरीरेणापिशून्यःतथापि
हेहिमगिरिसुतेतेतवअपांगात्नेत्रप्रांतात्कामप्यनिर्वच
नीयांकृपांलब्ध्वासर्वंनतुयत्किंचित्जगत्संसारवर्त्तिप्रा
णिसमूहंविजयतइत्यर्थः।विष्णुपक्षेकृपांकीदृशीहिमगि
ता रिसुतेकांहिमगिरिसुतायाःकःकामोवांछायत्रइःकामःस्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धैर्याद्दर्शीं भगवत्स्वरूपामासाद्य कामो जगत् वशीकरोति॥ ता
दृशीस्वरूपां विषयो येद्यहं स्यात्तदाहमपि कांतं वशीकुर्यामि
सेनेन तादृशस्वरूपाभिलाषो भगवत्या इत्याशयः॥ यद्वा हिमगि
रिसुतायामिकः कामोर्थान्महेश्वरस्य यतः तीमहेशानिष्ट
पावतीविषयाभिलाषजननशक्तिः कामस्य भगवत्स्व ॥५६॥
॥५६॥ रूपालय एवेति भावः॥६॥ श्लोकः॥ कणत्कांचीदामा करिकल
भकुंभस्तननम्रा परिक्षीणा मध्ये परिणतशरच्चंद्रवदना॥ ध
धनुर्बाणान्पाशं सृणिमपि दधाना करतलैः पुरस्तादा
स्तां नः पुरमथितुराहोपुरुषिका॥ ७॥ भगवतीस्वरूपमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धत्ते। अविद्यासंपर्करूपं दोषं विनाऽन्यगुणमखंडाद्वैतानंदरूपतां यन
न्नीयथः। अद्वौ जलाप्सयोर्दुग्धमिवे सथः। एजाऽक्रमश्चोत्तरीयैव॥
विष्णुपक्षेप्येवं समानं॥ ३८॥ श्लोकः॥ तव स्वाधिष्ठाने हुतवहमधिष्ठा
य निरतं तमीडे संवर्त्तं जननि महतीं तां च समयां॥ यदालोके लोकान्
दहति महति क्रोधकलिले दयार्द्रा या दृष्टिः शिशिरमुपचारं रचय
ति॥ ३९॥ क्रमप्राप्त तेजस मुख्य देव देव्यौ प्राह॥ तव स्वाधिष्ठान इति॥
हे जननि तव त्वदधिष्ठिते स्वाधिष्ठाने नाभिचक्रे दशदले शांभवचक्रे
मे स्वाधिष्ठानमणिपूरयोः स्थले वैपरीत्यं हुतवहमग्निमधिष्ठाय
निरतं स्थितं तं संवर्त्तं संवर्त्तेश्वरनामानं तं प्रसिद्धं तां प्रसिद्धां मह
ती अतिशायितां समयां महासमयाख्यां संज्ञिकां ईडे स्तौमि। यदालोके
यस्य संवर्त्तेश्वरस्य महती आलोके तीक्ष्णतरे ललाटलोचनानले।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रोधकलिले संजिहीर्षालक्षणकोपेन समाविष्टे। लोकान् चतुर्दश भु
वनानि दहति सति दयार्द्रकरुणाकोमलासिस्रक्षा विचेष्टेतियान
न्तातेतव समयां बारूपाया दृष्टिशिशिरमुपचारं श्रेयसंपादनेन पु
नरुज्जीवनं करोतीत्यर्थः उपासनारितिश्श्रोतैव। विष्णुपक्षे। जन
नमस्यास्तीति जननं जन्म तच्छीली जीवः। तेषु महती मतिः स्थितां जन
नि महतीमिति समयाविशेषणं जननी वाचरतीति जननी। विष्णुस्तस्य
संबोधनं वा। यदा लोकक्षयोः प्रेक्षणे लोकान् दहति सति तेतव विष्णोः
॥५२॥ दयार्द्रा दृष्टिः शिशिरमुपचारं रचयतीत्यर्थः॥३९॥ श्लोकः॥ तडित्वंतं
शक्त्या तिमिरपरिपंथिस्फुरणया स्फुरन्नानारत्नाभरणपरिण
द्धेंद्रधनुषं॥ तव श्यामं मेघं कमपि मणिपूरैकशरणं निषेवे वर्षं ॥५२॥
तं हरमिहिरतप्तं त्रिभुवनं॥४०॥ क्रमप्राप्तं पंरश्मिमनुरुध्य देवदेव्यो

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राह। तडित्वंतमिति। कमप्यनिर्वचनीयं मणिपूरैकशरणं षड्दलनाभ्यधो
वर्त्तिकमलमेवैकशरणं गृहं यस्य तं। [illegible] श्यामं कृष्णवर्णं मेघं मेघेश्व
रमस्तेश्वरापरपर्यायं निषेवे। कीदृशं शक्त्या सौदामिन्यंबया अम्ब
तैश्वर्य्यपरनामधेयया तडित्वंतं सौदामिनीमंतं। कीदृश्या तिमिरा
यामंधकाराणामज्ञानानां परिपंथिनाशकं स्फुरणं कांतिर्यस्याः सा
तया। पुनः कीदृशं नानारत्नाभरणरूपं परिणद्धं ध्वस्तं इंद्रधनुः येन तं।
पुनः कीदृशं हररूपेण प्राग्रुक्तसंवर्त्तेश्वरेण मिहिरेण सूर्येण तप्तं संतापि
तं। अंतर्भावितण्यर्थात्तपि धातोर्निष्ठा। त्रिभुवनं त्रैलोक्यं वर्षंतं सिंचंतं
विद्युत्पक्षे समानं॥३९॥ [illegible]॥ तवाधारे मूले सह समयया लास्यपर
यानवात्मानं वंदे नवरसमहातांडवनटं॥ उभाभ्यामेताभ्यामुदयविधि
मुद्दिश्य दयया सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदं॥४०॥ कमप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोपार्थिवरश्मिमुख्यदेवदेव्यावाह॥ तदाधारइति॥ तद्वत्वदधिष्ठितेमूले
आधारेचतुर्दलमूलाधारस्यचक्रेलास्यंशृंगाररसोचितनृत्यंतसरया
समययासमयाख्येरात्र्यास्सहनवात्मानंनवकूटमहाविधात्मकं
पद्धारवेत्तिनव्यूहरूपंनवरवंडनात्मकंवावस्तुतोनवेरसरूपंर
सोवैस इतिश्रुतेः। नवेरसोभिनेयाधत्रतोदृशंयन्महाताण्डवंनृत्यविशे
षस्तस्यनटंमभिनायकंवंदेमन्येइतिअपिपाठः। एताभ्यामुभाभ्यांना
टेश्वरीनाटेश्वराभ्यांइदंजगत्जनकजननीवत् मातापितृयुक्तंजज्ञे
॥६३॥ ज्ञोतांउदयविधिमुद्दिश्यदययासनाथाभ्यायांमहासंहारानंतरंजगदु
त्पत्तिमनुसंधायदययाकरुणयासनाथाभ्यांयुक्ताभ्यामित्यर्थः॥ स्मि
तस्मेरोन्मीलितानुग्रहरूपायथाएवंजगदुत्पन्नंविलोक्यसंतोषेणला ॥५६॥
स्यताण्डवसमुत्सुकाभ्यांदेवदेवीभ्यांजगदिदमातापितृमज्जातंमाता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ न व्यापारः व्योमजनानुकूलो यस्यास्तांऽयोः॥ व्योमेश्वरव्योमे
श्वयेरीयांया नहि गधिंयाभासा जगती जगदुन्निर्जीनसंततिः
च्चकोरीव विलसति शोभते। कीदृशीः शशिकिरणेन सारूप्या
समानाः सरणिः सुषुम्नापद्धतिर्यस्याः सा तथा। अतएव वि
धरतां तद्ध्वांतानिरस्तबाह्यविषयव्यासंगतिमित्यर्थः। कंठेकम
लकर्णिकायां व्योमेश्वरनाथश्रीपादुकां पूजयामि॥ व्योमेश्व
यंबाश्रीपादुकां पूजयामीति संप्रदायपरितोऽद्धास प्रतिरस्मयः॥
आनंदनाथश्रीपादुकां मंबाश्रीपादुकां पूजयामीति तत्त्वा मां
तेसंयोज्य अस्याः पूज्याश्चेतिक्रमः। विद्धुपक्षेप्येवं॥३६॥ श्लो॥
समुन्मीलत्संवित्कमलमकरंदैकरसिकं भजे हंसद्वंद्वं किम
पि महतां मानसचरं॥ यदालापादष्टादशगुणितविद्यापरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णातिर्यदापतेद्दोषाङ्कुणमखिलमध्वःपयइव॥३॥क्रमप्राप्तवा
यव्यरश्मिदेवदेव्याताह॥समुन्मीलदिति॥समुन्मीलंतीप्रकाश
मानायासंवित्कमलंज्ञानंतदेवयःकमलमकरंदरसाद्रसिकंमहतां
योगिनांमानसमेवमानंसततंचरतीतितं॥अतएवकिमप्यनि
र्वचनीयंहंसद्वंद्वंहंसेश्वरहंसेश्वरीरूपंभजे॥हंसःसोहंस्वाहा॥हं
॥९८॥ सेश्वरपरमहंसनाथश्रीपादुकांपूजयामि।सोहंहंसः।स्वाहापर
महंसहंसेश्वर्यैश्रीपादुकांपूजयामीतितयोर्भजनमंत्रः॥हंसद्व
यक्षरद्वयमेववातमंत्रः॥यद्वालोपातूयथोरुच्चारणात्अष्टाद
शक्षरगुणितानामष्टादशसंख्याकानांविद्यानांवेदचतुष्टयष
त्रोगुणितानामष्टादशसंख्याकानांविद्यानांवेदचतुष्टयष ॥५९॥
डंगपुराणन्यायमीमांसाधर्मशास्त्राणांपरिणतिःप्रकाशः॥हंस
साधर्म्यमाह॥यत्हंसद्वंद्वंदोषादोषमध्याङ्कुणंअमलंनिर्मलंआ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितरावपि पुत्रे जाते संतोषातिशयेनन्दयत इति भावः ॥ उभयविधिमिति पा
ठे उभयप्रकारस्थावरजंगमात्मकं स्थूलसूक्ष्मात्मकं वा जगदुद्दिश्य याद
या तया युक्ताभ्यामित्यर्थः ॥ विष्णुपक्षेपि समानं ॥४१॥ श्लोकः ॥ गतैर्माणिक्य
त्वं गगनमणिभिः सांद्रघटितं किरीटं हैमं ते हिमगिरिसुते कीर्त्तयतु यः ॥
स नीडेयच्छायास्फुरणशबलं चंद्रशकलं धनुः सौनासीरं किमिदमिति
बध्नाति धिषणां ॥४२॥ इतिदानीं मुकुटादिचरणांतमंगं स्तौति ॥ गतैरिति ।
हे हिमगिरिसुते । तव हैमं सुवर्णघटितं किरीटं कः कीर्तयतु तथापि सम्मी
ले डे स्तौमि । कीदृशं माणिक्यत्वं रत्नविशेषभावं गतैः प्राप्तैः गगनमणि
भिः द्वादशादित्यैः मित्रवरुणादिनामकैः सांद्रघटितं सुश्लिष्टतया यो
जितं यस्य मुकुटस्य छायया छुरणेन कांतिविलेपनेन शबलं नाना
वर्णं चंद्रशकलं कर्त्तृ सौनासीरं सुनासीरः इंद्रस्तत्संबंधि धनुःका

मुकुंद किमितदिति धिषणां बुद्धिं भ्रांतिजनयती अर्थः॥ विष्णुपक्षे॥ तेत
व हैमं कोटीरं हिमगिरि हिमसदृशीतले गिरिवच्चेने उपनिषद्रूपेसु
ते अभिव्यक्तेवृयिकेः कोस्यतु यरव्ववतु विष्णुसंबोधनं वाचं द्भुताक
लमितितु किरीटोपरिचोभार्थ घटिताईयंदाकृतिसुवर्णरवंउपरंन
रसिंकस्सर्त्तावर्द्धयंद्रसलोनसरंबा॥५३॥ श्लोकः॥ धुनोतु ध्वांतं भस्तु
लितदोलितेंदिवरवनं घनास्निग्धं श्यामं चिकुरनिकुरंबातव
॥५४॥ च्छिवे॥ यदीयं सोरभ्यं सहजमुपलब्धुं सुमनसो वसंति स्मिन्नन्येव
लमथनवाटीविटपिनां॥५४॥ धुनोत्विति॥ हे शिवे तव चिकुरनिकुरं
बं अलकसमूहः नोस्माकं ध्वांतं अज्ञानं धुनोतु नाशयतु कीदृशं
तुलितमुपमितं दलितं विकसितेंदिवरं श्यामकमलं तस्य वनंयेन ॥५५॥
तत् घनं निबिडं च तत् स्निग्धं चिक्कणं चेति तत् अस्मम स्थूलं यदीयं चि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुरनिकुरंबीयंसोरभ्यंसहजंस्वाभाविकंउपलब्धुंशिक्षितुंबलमथनइंद्रस्त
स्यवाटीनंदनवनंतत्रयेविटपिनःकल्पवृक्षास्तेषांसुमनसःपुष्पाणिअस्मिन्
चिकुरनिकुरंबेवसंतीत्यहंमन्ये।विधुपक्षे॥शिवेकल्याणनिमित्तमितिधु
नोतुक्रियान्वितंवसतिक्रियान्वितंवाशिवायाःइःकामोयस्मादितिव्युत्पत्त्या
विधुसंबोधनंवा॥४२॥श्लोकः॥वहंतीसिंदूरंप्रबलकबरीभारतिमिरद्विषां
वृंदैर्बंदीकृतमिवनवीनार्ककिरणं॥तनोतुक्षेमंनस्तववदनसौंदर्यल
हरीपरीवाहःस्रोतःसरणिरिवसीमंतसरणिः॥४३॥वहंतीमिति॥तव
सीमंतसरणिःद्विधाकृतकेशपाशमध्यरेखापद्धतिःनोऽस्माकंक्षेमं
कल्याणंतनोतु।विस्तारयतु।कीदृशीसिंदूरंवहंतीकमिवप्रबलोव
लिष्ठोयःकबरीभारःकेशपाशःसएवतिमिरंअंधकारंतस्यत्विषांकां
तीनांद्विषामितिपाठेतिमिररूपशत्रूणांवृंदैःसमूहैःबंदीकृतंविजित्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहीतं नवीनार्ककिरणमिव बालादित्यमयुखमिव पुनः कीदृशी सीमंतस
रणि तव वदनस्य या सौंदर्यलहरी लावण्यतरंगस्तत्परीवाहर्थं यतस्त्रो
तस्तस्य सरणिः प्रणालिकेव परीवाहो नामो द्धृतजलवेहिस्सारेण तेन
सौंदर्यस्यायेत परिपूरितत्वं ध्वन्यते। विष्णुपक्षे। गोचरणकाले नवी
नार्ककिरणं वेहंतीत व सीमंतसरणि सिमंतस्सदृशावसौमिमस्से मंतनो
तु। किमिव सिंदूरमिव अत एव सीमंतपदोपादानं॥ ऊर्ध्वाभ्यां मणिवंशी
वादनपरं मुद्गालसत्तुस्तकपाशी चांकुशामैक्षवं धनुरिषुं पौष्पं दधानं
करैः॥ गोपीगोपपरीवृतं सुरतरोर्मूले स्थितं हारिणं स्त्रीवेषं मणिभूष
॥२५॥ णोज्वलममुं कृष्णं भजेत्सुंदरमिति। सुंदरी गोपालध्यानाभिप्रायेण वेदं
संगमनीयं॥ ४३॥ श्लोकः॥ अरालैः स्वाभाव्यादलिकलभसश्रीभिरलं ॥५५॥
कैः परीतं ते वक्त्रं परिहसति पंकेरुहरुचिं॥ दरस्मेरे यस्मिन्दशनरुचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंजल्करुचिरे सुगंधौ माद्यंतिस्मरमथनस्य चक्षुर्मधुलिहः ॥४॥ अराले
रिति। अलकैः कुंतलैः परीतं वेष्टितं तेन तव वक्त्रं मुखं कर्तृ पंकेरुहरुचिं
कमलकांतिं परिभवति तिरस्करोति। कीदृशै रलकैः स्वाभाव्यात् स्व
र्थे स्वच्। कुटिलै वेष्टितस्य परपरिभावकत्व मुचितमेवेति ध्वनिः। पु
नः कीदृशैः अलिकुलं भ्रमरसमूहं हसतीत्यलिकुलहसा श्री शोभा ये
षां तैः अलिकुलहसुश्रीभिरिति पाठे अलिबालकसमानकांतिरित्यर्थः।
यस्मिन् वक्त्रे स्मरमथनस्य शंभोः चक्षुंष्येव मधुलिहो भ्रमराः माद्यं
ति कीदृशोदरस्मेरे ईषद्विकसिते दशानरुच्चयः दंतकांते यत्र वा किंजल्का
नि केसराणि तैः रुचिरे मनोज्ञे सुगंधौ सौरभ्यशालिनि। विधुपक्षे।
हे स्मरमथन स्मरेण गोपीमथ्नातीत्यर्थः। यद्वा भक्तानां स्मरं मथ्नातीत्यर्थः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन्न् चक्षुर्मधुलिहो माद्यंतीत्यन्वयः ॥४४॥ श्लोकः ॥ ललाटं लावण्यद्यु
तिविमलमाभाति तव यत् द्वितीयं तन्मन्ये मुकुटशशिखंडस्य शकलं ॥
विपर्यासंन्यासादुभयमपि संभूय मिलितं सुधालेपस्फूर्त्तिः परिण
मिति राकाहिमकरः ॥४५॥ ललाटमिति ॥ तव ललाटं लावण्येन सौं
दर्येण द्युत्या कांत्या च विमलं यदाभाति तत् मुकुटे शशिखंडस्य द्विती
यं शकलं खंडं मन्ये ॥ तत्र हेतुमाह ॥ विपर्यासंन्यासात् ऊर्ध्वमुखस्य
चंद्रखंडस्य अधोमुखस्य ललाटस्य वैपरीत्येन न्यासात् ॥ उभय
मपि संपद्य मिलितं यदा भवति तदा सुधालेपेनामृतलेपेन स्फूर्त्तिः
खंडयोरेकीभावो यत्र स राकाहिमकरः पूर्णिमा चंद्रः परिणमति संप
॥५६॥ द्यत इत्यर्थः ॥ विरुद्धपक्षेप्येवं ॥ मुकुटशशिखंडो भालं कारणरूपः ॥ ॥५६॥
॥४६॥ श्लोकः ॥ भ्रुवौ भुग्ने किंचिद्भुवनभयभंगव्यसनिनि त्वदीये ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्राभ्यां मधुकररुचिभ्यां धृतगुणे ॥ धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः
प्रकोष्ठे मुष्टौ च स्थगयति निगूढांतरमिदं ॥ ४५ ॥ भुजाविति ॥ हे भुवनभ
यभंग व्यसनिनिजगाद्भयभंजेनशीले । इमे त्वदीयभुजौ धनुः सव्येतर
करगृहीतं वामहस्तधृतं निगूढांतरं आच्छादितमध्यं रतिपतिः कामप्र
कोष्ठे मुष्टौ च स्थगयती त्याच्छोदयतीतिमन्ये । कीदृशौ किंचित् भुग्ने इ
षद्वक्रे मधुकररुचिभ्यां भ्रमरतुल्याभ्यां नेत्राभ्यां धृतो गुणो । मौर्वी
यत्र ते । विष्णुपक्षे ॥ भुवनभयभं । गस्य विशेषणं व्यसनिनिःक्षेपके
भुवनभया वहे इति प्रकोष्ठविशेषणं उत्कृष्टा मलक्ष्मीः शोभा विद्य
ते यस्मिन् इति व्युत्पत्त्या उमे इति प्रकोष्ठविशेषणं भ्रू विशेषणं वा एवं
वक्ष्यमाणेरेव संबोधनं वा शेषं समानं ॥ ४६ ॥ श्लोकः ॥ अहः स्रते सव्यं ते
वनयनमर्कात्मिकतया त्रियामां वामं ते स्रजतिरजनीनायकतया ॥

तृतीया दृष्टिस्ते दरदलितहेमांबुजरुचिः समाधत्ते संध्यां दिवसनिशयो
२ रंतरचरीं॥४७॥ अहः सूतेति॥ तव दक्षिणनयनं अर्कात्मकतया सूर्यात्मि
कत्वाद्धेतोः अहः दिनं सूते सृजति। वामं नयनं रजनीनायकतया चंद्र
त्वाद्धेतोः त्रियामां रात्रिं सृजति। ते तव तृतीया दृष्टिः भालगता दरदलि
तहेमांबुजरुचिः ईषद्विकचक[illegible]॥नककमलकांतिः दिवसनिशा
योर्दिनरात्र्योः अंतरेचरीं मध्यवर्त्तिनीं संध्यां समाधत्ते॥ जनयतीत्यर्थः॥
विष्णुपक्षेप्येवं॥ तत्र तृतीयनेत्रवर्णनं त्सिंहमप्यं क्षिप्रायेण॥४७॥ श्लो
॥५७॥ कः॥ विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः कृपाधाराधारा
किमपि मधुराभोगवतिका॥ अवंती दृष्टिस्ते बहुनगरविस्तारविजया
ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते॥४८॥ विशालेति॥ ते तव दृष्टि ॥५८
विजयन्त्यः॥ कीदृशी बहूनां नगराणां विस्तारस्य विशालतागुणस्य

विजयादभिभवात् तासां नगरीणां नाममभिर्व्यवहरणं व्यवहारस्तद्योग्या व
कुनगरविस्तार विजयेतिपाठे वहूनां नगराणां विस्तारस्य विजयो यस्यां
सेति दृष्टिविशेषणं तत्तन्नामव्यवहरणयोग्यत्वमेव दर्शयिति। विशाला
विस्तीर्णा विशालानाम्नी नगरी च कल्याणी कल्याणगुणविशिष्टा गंध
वनगरी च स्फुटरुचिः व्यक्तकांतिः कुवलयैः इंदीवरैः पृथ्वीमंडलेऽभ्य
धिका योध्या योद्धुमशक्या रामनगरी च रेपाधारायाः कारुण्यप्रवाह
स्याधारभूता धारानाम्नी नगरी च किमपि मधुरा अनिर्वचनीयमनोह
रगुणा मधुरानाम वरिष्ठनगरी च मधुरा मथुरा वरिष्ठनगरी मधुनिर्मि
तेति विश्वकोशः॥ भोगवतिका भोगवती भ्रमत इति कः स्वार्थे भोगवती पाताल
नगरी च अवंती भक्तजनं रक्षती अवंतीनगरी चेति। विशुपक्षे येवं॥४८॥
॥श्लोकः॥ कवीनां संदर्भस्तबकमकरंदैकरसिकं कटाक्षव्याक्षेपभ्रमर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलभौ कर्णयुगलं ॥ अमुं चेतो दृष्ट्वा तव नवरसास्वादतरला वस्या संस
र्गादलिकनयनं किंचिदरुणं ॥ ४७ ॥ कवीनामिति ॥ तव अलिकनयनं ल
लाटलोचनं कर्तृ कराक्षव्याक्षेपः अपांगविस्फुरणता वेवभ्रमरकल
भौ षट्पदबालकौ कर्णयुगले अमुं चेतो दृष्ट्वा अस्या संसर्गात् स्वस्य
ललाटस्थ तया कर्णपर्यंतं गमनाभावेनेर्ष्या संपर्कात् अरुणं रक्तं किंचि
दितकौ किंचिदित्यपि पाठः । कर्णयुगलं की दृशं कवीनां व्या साधीनां संद
र्भो वा गुफः स एव स्तवकस्तत्र यो मकरंदः शृंगारादिरसस्तेनैकेन भरिते
॥५८॥ परं भ्रमरकलभौ की दृशौ नवरसास्वादतरलौ शृंगारादिनवरसास्वा
दलोलुपौ ॥ विष्णुपक्षे ॥ नरसिंहमूर्त्यभिप्रायेण ललाटलोचनं वर्णनं ॥
माणिक्यादिसमप्रभं निजरत्यासंत्रसेरक्षोगणं आनुव्यस्तकरांबुजं
त्रिनयनं रत्नोल्लसभूषणं । बाहुभ्यां धृतशंखचक्रमनिशं दंष्ट्रोग्रव ॥५८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रोधेन सज्वालाजिह्वसुदग्रकेशानिचयं वंदे नृसिंहं विभुमिति तथ्यानात ||
||४९|| श्लोक || शिवे श्रृंगारार्द्रा तदितरमुखे कुत्सनपरा सरोषा गंगायां
गिरिशाचरिते विस्मयवती || हराहिभ्यो भीता सरसिरुहसौभाग्यजन
नी सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ||५०|| शिवे श्रृंगारा इ
ति || शिवे शंभौ श्रृंगाररसेनार्द्रा तदितरमुखे अन्यदेवमुखे कुत्सन
परा अनेन बीभत्सरसः | गंगायां शिवशिरसि वर्त्तमानायां सपत्न्यां
सरोषेति रौद्ररसः | गिरिशाचरिते परस्परविरुद्धानलचंद्रादिधा
रणरूपे विस्मयवती अनेनाद्भुतरसः | हरस्य शिवस्य अहिभ्यां भू
षणीभूतसर्पेभ्यो भीता भयानकरसोपेता सरसिरुहाणां कमलानां
सौभाग्यस्य सौंदर्यस्य जननीति वीररसः सखीषु शिवानुरागादि
प्रश्नपरासु स्मेरा ईषद्धास्यवती मयि दीने सकरुणा कारुण्यमाविष्टा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेतव दृष्टिर्जयति। जयतीयत्र जननीति पाठे हे जननीति संबोधनं॥ विधु
पक्षे॥ शिवे शोभने गोपीजने तदितरमुखे भ्रूपनि स्वादि राक्षसीमुखे गं
गायां अनवरतं जीवा नारायणतां प्रापयंत्यां गिरिशाचरिते कामभ
स्मीकरणवामांगे वामलोचनगाधारणादोहरं तीजीवमिति हरा॥ अह
यः सर्पाः कालियादयः तेभ्यः भीताभयाक्रांतान यमुनाः अभीताइत्य
कारप्रश्लेषो वाई स्वरवीषु जननी दृष्टिरिति पाठे जननं अस्मामीषोम
स्तीति जननि नो जीवास्तेषु दृष्टिः तवदूत्यर्थः॥ जननिमयीति पाठे ज
ननीति सर्वबुद्धिस्कोरेव संबोधनं॥५०॥ श्लोकः॥ गतेकर्णाभ्यर्णं गरु
तइव पक्ष्माणि दधती पुरां भेत्तुश्चित्तप्रशमरसविद्रावणफले॥ इ
मेनेत्रे गोत्राधरपतिकुलोत्तंसकलिके तवाकर्णाकृष्टस्मरशरवि
लासं कलयतः॥५१॥ गतेकर्णाभ्यर्णमिति। हे गोत्राधरपतिकुलो

॥५९॥

पा

॥५९

त्तंसकलिके गोत्रा पृथ्वीं तां धरतीति गोत्राधरः पर्वतस्तस्य पतिः ईश्वरो हि
मालयस्तस्य कुलं वंशस्तस्य उत्तंस कलिके शिरोभूषण कोरके रूपेत
व इमे नेत्रे आकर्णास्पृष्टस्मरशरविलासं कर्णपर्यंताकृष्टकामं मार्गे
ण शोभां कलयतः। धारयतः॥ नेत्रे कीदृशे कर्णाभ्यर्णं निकटं गते प्रा
ते गरुत इव बाणपक्षाणीव पक्ष्माणी धारयती पुरं भेत्तुः शिवस्य प्रत्रा
लं मरसविद्रावणफले शांतिरसदूरीकरणं फलं प्रयोजनमेव फलं ययो
स्तयोरिति परंपरितरूपकं॥ विष्णुपक्षे॥ हे गोत्राधर हे पृथ्वीध
र हे पति कुलोत्तंस कलिके तपतिः पालकस्तस्य कुलं समूहस्तस्य
उत्तंसः शिरोभूषणं तद्रूपाया कलिका कोरकस्तां तत्साद्रूप्यं इतप्रा
प्तः वाशब्दः। किंस्विदर्थे उ आकर्णेति वा छंदः। उ वितर्के। अथ वा हे प
ति कुलोत्तंस पालक समूह शिरोधार्य यद्वा गोत्राधरपतिः गोवर्द्धन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तत्कुलोत्तंसतत्त्वं शशिशिरोभूषणात तद्धारणेन तत्कुलप्रतिष्ठाजनकेति
यावत्। हे कलिके तोकले दुःखे स्य कलियुगस्य वा नाशक पुरंजा
ग्रस्त्वमसुषुप्त्यवस्थारूपपुरत्रयाणां भर्त्तर्निर्वाकस्य तव इमे गोपी
नां प्रशामरससिंद्रावणफले नेत्रे आकर्णावरुप्रस्मरशरविलासंकल
यतइ सुधीः ॥५१॥ श्लोक॥ विभक्तत्रैवर्ण्यं व्यतिकरितनीलांबुजनै
तया विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते। पुनः स्रष्टुं देवान्
॥६७॥ द्रुहिणहरिरुद्रानुपरतान् रजःसत्वं बिभ्रत्तम इति गुणानां त्रयमिव॥
॥५२॥ विभक्तेति। हे ईशानदयिते शिववल्लभे त्वन्नेत्रत्रितयमिदं
उपरतान् प्रलयंगतान् द्रुहिणहरिरुद्रान् ब्रह्मविष्णुशिवान् पुनः ॥६७
स्रष्टुं रजःसत्वतम इति गुणानां त्रयं बिभ्रदिव विभाति। कीदृशं
भी

नेत्रत्रयं व्यतिकरितनीलांजनतया संबद्धाया कज्जललतातया विभक्त
त्रैवर्ण्यं विभक्तं संबद्धं त्रिवर्णं वत्रै वर्ण्यं यत्रे सर्थः। विभक्तत्रैवर्ण्यव्य
तिकरितनीलांबुजनतयेति क्वचित्पाठः। तत्रे विभक्तेन व्यक्तेन त्रैव
र्ण्येन वर्णत्रयेण श्वेतरक्तनीलरूपेणा व्यतिकरितं संबद्धं यन्नीलांज
नतद्भावेन देवान् स्रष्टुं गुणानां त्रयं बिभ्रदित्यन्वयः॥ विष्णोर्नाभि
कमलेन एक एव स्रष्टः ब्रह्मा त्वं नेत्र कमलेन ब्रह्मा विष्णु रुद्राः स्रष्टा इ
तिव्यतिरेकालंकारः॥ विष्णुपक्षे॥ ईशान हे ईश्वर दयिते भक्तजने
तदुपरि त्वन्नेत्रत्रितयं इदं कामदं गुणानां त्रयं बिभ्रदिव विभाती
सर्थः। हरिरिंद्रः न्तः सिंह मत्स्याभिप्रायेण न नेत्रत्रयवर्णनं शेषं समा
नं॥ ५२॥ श्लोकः॥ पवित्रीकर्तुं नः पशुपतिपराधीनहृदये दयामित्रै
नेत्रैररुणधवलश्यामरुचिभिः॥ नदः शोणो गंगा तपनतनयेन

य

येति भुवममुं त्रयाणां तीर्थानामुपनेसि संभेदमनघे ॥५३॥ पवित्रीकर्तु
मिति। हे पशुपतिपराधीनहृदये सिकाधीनमानसे अनघे निःपा
पे ध्रुवं निश्चितं नोस्मान् पवित्रीकर्तुं नेत्रैः शोणो नदः गंगा त्रिपथ
गा तपनतनया यमुना इति त्रयाणां तीर्थानां अमुं संभेदं संगमं उप
नयसि प्रापयसि। नेत्रैः किंदृशैः दयाभिन्नैः दयैव अभिन्नं येषां तैः पुनः
॥६१॥ कीदृशैः अरुणधवलस्यामरुचिभिः रक्तशुक्लकृष्णकांतिभिः। वि
छुपक्षे॥ पशुपतिपराधीनहृदीति गंगाविशेषणं अयेति संबोध
नपदं। यद्वा पशुपतिपराधीनहृदयेति गंगाविशेषणं इदयेति य ॥६१॥
मुनाविशेषणं तत्र इं कामं ददातीति इंदः स्वच्छस्तेन तस्मादरं याती
त्यर्थः। उभयोः स्वच्छवर्णत्वादनघे स्वच्छानेमुखस्वरूपे त्रयाणां तीर्थानां
संभेदमुपनयसीत्यर्थः। अनघे निःपापे जने दयामित्रैरिति वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्वयः॥५३॥ श्लोकः॥ तवापर्णेकर्णेजपनयनपैशुन्यचकिता निलीयंते
तोयेतैर्यं नियतमनिमेषाः शाफरिकाः॥ इयंच श्रीर्बद्धछदपुटकपा
टं कुवलयं जहाति प्रस्यूषे निशिच विघटय्य प्रविशति॥५४॥ तवाक
र्णेति॥ हे अपर्णे कर्णे प्राप्य जपतोः कथयतोः तव नयनयोः पैशुन्यात्
चकिताः भीताः शाफरिकाः प्रोष्ट्यः नियतं निश्चितं तोये निलीयंते जल
दुर्गमाश्रयंति इयं च श्रीः कमलकांतिः तव नयनपैशुन्यचकिता प्र
त्यूषे प्रातः बद्धछदपुटकपाटं निमीलितदलकपाटं कुवलयं कम
लं जहाति त्यजति निशि रात्रौ विघटय्य उद्घाट्य प्रविशति॥ रात्रौ विर
ह्रोजनस्तु रात्रौ निभृतलतयातिष्ठति दिवसे कपाटं दत्वा पलायते ति
लोकसिद्धं वस्तुतस्तु प्रस्यूषे विघटय्य जहाति। निशि बद्धछदपु
टकपाटं प्रविशतीति संबंधः॥ विकुपक्षे॥ अपगतऋणं मातः पि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तदेवर्षिऋणंयस्यावपर्णोधार्मिकः वसुदेवोवातस्यायंहितः अपसो
वाअपर्णः भगवान्तस्यसंबोधनं हे अपर्णे। यद्वातोयेकीदृशो आ
॥६२॥ पर्णेपात्रादिकालुष्यरहिते यद्वासमुद्ररूपशायनस्थानस्यकौ
स्तुभरूपरत्नस्यलक्ष्मीरूपसुतायाश्चदानादपगतऋणंतथाच
जलेलक्ष्मिर्गेभितितत्वदीयातदाश्रयणंस्वरक्षार्थंयुक्तमेवेतिभावः॥
॥५४॥ श्लोकः॥ निमेषोन्मेषाभ्यांप्रलयमुदयंयातिजगतीतवेत्या
हुः संतोधरणिधरराजन्यतनये॥ त्वदुन्मेषाज्जातंजगदिदमशे
षंप्रलयतः परित्रातुंशंकेपरिहृतनिमेषास्तवदृशः॥५५॥ निमे
षेति॥ धरणिधरराजन्यतनये हे शैलाधिराजसुते तव निमेषा
न्मेषाभ्यां अक्षिनिमीलनोन्मीलनाभ्यां जगती पृथ्वी प्रलयं नाशं ॥६२॥
उदयमुत्पत्तिं याति प्राप्नोति इति संत आहुः॥ त्वदुन्मेषात्तवलोच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोन्मीलनात् जातं प्रादुर्भूतं तमश्शेषं जगत् प्रलयतः संहारात् त्रातुं तव
दृशः परिहृतनिमेषाः सन्तु निमीलनात् इति शंकेत कथयामीत्यर्थः॥
विष्णुपक्षे॥ हे धरणिधर पृथ्वीधर राजन्यो राजा चंद्रः तनयो यस्य स
राजन्यतनयः समुद्रस्तस्मिन् निमेषोन्मेषाभ्यां जगती प्रलयं लीनतां।
उदयं व्यक्तिं यातीत्यर्थः॥५५॥ श्लोकः॥ दृशा द्राघीयस्या दरदलितनीलो
त्पलरुचा दवीयांसं दीनं स्नपय कृपया मामपि शिवे॥ अनेनायं धन्यो भ
वति न च ते हानिरियता वने वा हर्म्ये वा समकरनिपातो हिमकरः॥५६॥
दृशेति। हे शिवे कृपया करुणया मामपि दवीयांसं दूरस्थं दीनं दुःखितं
द्राघीयस्या दीर्घतरया दरदलितनीलोत्पलरुचा ईषद्विकसित
श्यामा सरोजकान्त्या दृशया दृष्ट्या स्नपय अनेन स्नपनेन अहं धन्यः कृ
तार्थश्च पुनः ते तव हानिः क्षितिर्न भवति। वने कानने हर्म्ये गृहे हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मकरध्वंजः समकरनिपातः समानकरप्रसरः यथा ओषधीशस्यापि
चंद्रस्य वनेन पक्षपातः हर्म्येषु नापक्षपातः तथा त वापि निकटस्थे न प
क्षपातो दूरस्थे मयि नापक्षपातः। समुचितेति भावः॥ विष्णुपक्षे। श्रीवेक
ल्याणार्थं शोभसमानं॥५६॥ श्लोकः॥ अरालं ते पालीयुगलमगराजन्यत
नये न केषामाधत्ते कुसुमशरकोदंडकुतुकं॥ तिरश्चीनो यत्र श्रवणपथ
मुल्लंघ्य विलसन्नपांगव्यासंगो दिशति शरसंधानधिषणां॥५७॥ अराल
मिति। हे अगराजन्यतनये पर्वतराजपुत्रि ते तव अरालं वक्रं पालीयुगलं
॥६३॥ हृदयं केषां जनानां कुसुमशरकोदंडकुतुकं कामकार्मुककौतुकं न आ
धत्ते जनयति। अपि तु सर्वेषां जनयतीत्यर्थः। यत्र पालीयुगले तिरश्चीनो ॥६३॥
वक्रः श्रवणपथं कर्णप्रांतमुल्लंघ्य विलसन् शोभमानः अपांगव्यासंगः।
कटाक्षविक्षेपः शरसंधानधिषणां बाणसंयोजनबुद्धिं दिशति संपाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्य

यतिइत्यर्थः ॥ विरूपाक्षे ॥ हे अगराजन्यतनयेन अंबिकं गच्छती स्वगो वेछवः स्त
द्राजन्यस्त छेष्ठ भ्यासो तनय इव तनयः परिपाल्यत्वात् तस्य इन प्रभो अग
राजन्यतनया पार्वती तस्या इन प्रभो इति वा अगराजनैतनयेनेतितृतीया
पदं अगराजन्यतनयेन वेछवेन मेनाकेन वा सह केषां अआधत्त इति प
दच्छेदः अकारो नकारार्थकः केषां कुतुकं नधत्त इत्यर्थः ॥ शेषं समानं ॥ ५७ ॥
श्लोकः ॥ स्फुरत्कुंडलाभोग प्रतिफलित ताटंकयुगले चतुश्चक्रं मन्ये तव मु
खमिदं मन्मथरथं ॥ यमारुह्य द्रुह्यत्यवनिरथमर्केंदुचरणं महावीरो मा
रः प्रमथपतये सज्जितवते ॥ ५८ ॥ ५ स्फुरत्कुंडेति ॥ स्फुरतोः गंडभोगयोः
कपोलस्थलयोः प्रतिफलितं प्रतिबिंबितं ताटंकयुगलं कर्णभूषणाविशे
षद्वयं यत्र तत् इदं मुखं चतुश्चक्रं मन्मथरथं मन्ये ॥ बिंबप्रतिबिंबाभ्यां
ताटंकरूपचतु[ष्ट]योपलंभात् ॥ यं रथमारुह्य महावीरो कंदर्पः प्रमथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतये महारुद्राय दुहचकीदशाय अर्केंदु चरणं सूर्यशशिनौ चक्रद्वयं अवनि
रथं भूमिरथं मारुह्य। अस्वं परं शत्रुं त्रिपुरं जितवते तिरस्कृतवते अत्रा
रूढे सूर्य यात्रान्वेति। अथवा अवनिरथं सुष्ठु अंजितवते यो जितव
ते प्रमथपतये इत्यर्थः। मन्यतु भक्तं मन्मथरथं तं नमुखं कर्तु अर्केंदु च
रणं अवनिरथं यमारूढं मारः प्रमथपतये दुह्यतीति वा संबंधः॥ वि
द्धुपक्षे॥ सुंदरी गोपालध्यानाभिप्रायेण मोहिनीरूपाभिप्रायेण वा तं
टकरूप स्त्रीभूषणवर्णनं ताटंकयुगुलं नितंबे नुकरोतीति त्र्युत्पत्त्या कुं
॥६४॥ उलपरं वा ताटंकयुगलपदं॥ ५८॥ सरस्वत्याः सूक्तीरमृतलहरीकौशा
लहरीपिबंत्याः शर्वाणि श्रवणचुलुकाभ्यामविरतं॥ चमत्कारश्ला
घाचलितशिरसः कुंडलगणो रणत्कारैः स्तारैः प्रतिवचनमाचष्ट इव ॥६४॥
ते॥ ५९॥ सरस्वत्याइति। हे शर्वाणि सरस्वत्याः सूक्तीर्गद्यपद्यरूपाः श्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्णाच्चषकाभ्यां मविरतं पिबंत्यास्तेतव कुंडलगणः तारैरत्कटैः रणत्कारैः शब्द
विशेषैः प्रतिवचनं प्रत्युत्तरं आचष्ट इव दत्त इव सूक्तीः कीदृशीः अमृतलह
रीकौशलहरीः अमृतलहरीणां सुधातरंगाणां कौशलं माधुर्यं हरंतीः न्यू
नं कुर्वंतीत्यर्थः। तव कीदृश्याः चमत्कारेण या श्लाघा स्माधुवादोत्सुकता अ
थवा चमत्कारस्याया श्लाघा सा एव क्रिसत्तया चलितं कंपितं शिरोयस्या
इत्यर्थः। विद्युत्पक्षे॥ शर्वस्य शिवस्य अणः प्राणनं जीवनं आकाशरूपं वि
द्यते यत्र तत्संबुद्धौ शर्वाणि श्रवणं कर्णं स एव रूपाभ्यां चषकाभ्यां पानपात्राभ्यां ते
तव सूक्तीः पिबंत्याः सरस्वत्याः कुंडलगणो रणत्कारैः प्रतिवचनमाचष्ट
इवेत्यर्थः॥५९॥ श्लोकः॥ असौ नासावंशस्तुहिनगिरिवंशध्वजपटि त्वदी
यो नेदीयः फलतु फलमस्माकमुचितं॥ वहन्नंतर्मुक्ताः शिशिरतरनि
श्वाससघटितासमृध्यायस्तासां बहिरपि च मुक्तामणिधरः॥६०॥ अस्या
र्थिति। हे तुहिनगिरिवंशध्वजपटिपताके त्वदीयोसौ नासावंशः अस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंनेदीयोनिकटवर्त्तिसमुचितं तव भद्रक्रियोग्यफलं तंतु फलतु॥ देशविशे
षे वंशानुक्रमेणोत्पत्तिरिति कविसंप्रदायमनुस्मरन्नाह॥ अंतः अभ्यंतरे
शिशिरतरेण शीतलेन निश्वासेन घटिता निर्मिताः विदिता इति पाठे
ज्ञाताः मुक्ताः वहन्त्यो नासावंशाः तासां मुक्तानां समृद्ध्या संपत्त्या बहि
रपि बहिःप्रदेशेपि नासाग्रमौक्तिकव्याजेन मुक्तामणिधरः मुक्ताद्वे
रूपमणिधारकः॥ विष्णुपक्षे॥ नासावंशाः कीदृशाः तुहिनगिरिवंशं
ध्वजपटो गौरीरूपोस्यास्तीति तुहिनगिरिवंशध्वजपटी महादेवः त
स्य भावः तुहिनगिरिवंशध्वजपटीत्वं ददातीति तुहिनगिरिवंशध्वज
॥६५॥ पटीत्वदः शिवस्या[illegible]पुण्यदो विष्णुस्तदीयस्तत्संबंधी शेषं समानं ना
साग्रे गजमौक्तिकं करतले वेणुः करे कंकणमित्यादि गोपालध्यानान्ना ॥६५॥
साग्रमौक्तिकवर्णनेनानुपपन्नं॥६०॥ श्लोकः॥ प्रेंखत्यारक्तायस्तव सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दति दंतछंदरुचेः प्रवक्ष्ये सादृश्यं जनयति कथं विद्रुमलता॥ न बिंबं तद्बिंबप्रतिफलनलाभादरुणितं तुलामध्यारोढुं कथमिव विलज्जेत कलया॥ इ॥
प्रवृत्याद् इति॥ हे सुदति प्रकृत्या स्वभावेन रक्तायाः लोहितायास्तव दंतच्छदरुचेः अधरकांतेः सादृश्यं प्रवक्ष्ये विद्रुमलता तर्हि फलं जनयतु प्रवक्ष्ये इत्यत्र वराकी ति फलमित्यत्र च कथमति समीचीनः पाठः। बिंबं कलयाप्येकदेशेनापि कथमपि कष्टेन तुल्यां अध्यारोढुं न विलज्जेत अपि तु लज्जेतैव कथमिवेति पाठे इवशब्दो वाक्यालंकारे। की दृशं बिंबप्रतिफलनलाभादरुणितं त्वन्मूर्तिप्रतिबिंबेवशादरुणं दृग्बिंबप्रतिफलनेति क्वचित्पाठः। तत्र दृग्बिंबं सूर्यबिंबं सूर्यस्य दक्षिणनेत्रत्वात् तत्र प्रतिफलनं पाक्स्तल्लाभादित्यर्थः। विद्रुपक्षे॥ सुदति शोभनदंते सादृश्यं प्रकृत्या रक्ताया दंतच्छदरुच्य सादृश्यं प्रवक्ष्ये दित्यर्थः। दंतच्छदारुण्य

२५

वर्णन सुंदरीगोपालम्र संभिप्रायेण॥६२॥श्लोक॥ स्मितज्योत्स्नाजालं तववद
नचंद्रस्य पिबतांच कोराणामासीदतिरसतया चंचुजडिमा॥ अतस्तेशी
तांशोरमृतलहरीमम्लरुचयः पिबंति स्वच्छंदं निशिनिशि भृशं कांजि
कधिया॥६२॥ स्मितेति॥ तववदनचंद्रस्य त्वन्मुखेंदोः स्मितमिषद्धास्य
एव ज्योत्स्ना तस्या जालं समूहं पिबतांच कोराणां अतिरसतया अयं
तमधुरतया चंचुजडिमा अरुचिरासीत्॥ अतो हेतोः अरुणाशाचिं
ताधं ते चकोराः अम्लरुचयः संतः कांजिकधिया आरनालबुध्या नि
॥६६॥ शिनिशि रात्रौ रात्रौ भृशं अतिशयेन स्वच्छंदं स्वेच्छया शीतांशोश्चंद्रस्य
अमृतलहरीं सुधाधारां पिबंतीत्यर्थः विरूपक्षेप्येवं॥६२॥श्लोक॥ अ ॥६६॥
विश्रांतं पत्युर्गुणगणकथाम्रेडनपरा जपापुष्पच्छाया तवजननि जिह्वा
विजयते॥ यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी सरस्वत्यामूर्तिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भि

परिणमैति माणिक्यवपुषा ॥ ६३ ॥ अविश्रांतमिति ॥ हे जननि तव जिह्वा रसनावि
जयते पशुपतेः शिवस्य अविश्रांतं निरंतरं गुणगणकथायाः धर्मज्ञानवैरा
ग्यैश्वर्यादिप्रजल्पनस्य आम्रेडनेन आवर्तनेन जडा इतरस्याग्रहणवैमु
खेन तदेकनामग्रहणमात्रोल्लेपेक्षणशक्तिका जपापुष्पछायाप्रसन्न
कांति यस्या जिह्वायाः अग्रे आसीनायाः उपविष्टायाः सरस्वत्याः मूर्त्तिः स्फटि
कदृषत् स्फटिकपाषाणस्तद्वद्धा विमला स्वेता छविः कांतिस्तन्मयी तद्गु
णा माणिक्यवपुषा माणिक्यमणिसमानरूपेण परिणाम मणिश्वेतरूपं य
त्वाकारस्वरूपं बिभ्रतीति भावः ॥ विष्णुपक्षे ॥ पशुपालकस्य तव जननं प्रादु
र्भावो देहपरिग्रहो यस्या अस्तीति जननी तस्य जनने निःकृत देहपरिग्रहस्य
जिह्वा जननि जिह्वा विजयते जननीति सर्वत्र विष्णु संबोधनं वा त्रो पंसमा
नं ॥ ६३ ॥ श्लोक ॥ रणे जित्वा दैत्यान पहृत शिरस्त्रैः कवचिभिर्निवृत्तैस्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंशांशुस्त्रिपुरहरनिर्माल्यविमुखैः॥ विरिंचींद्रोपेंद्रैः शशिशकलकर्पू
रधवला विलुप्यंते मातस्तव वदनतांबूलशकला॥६॥ स्पो जिव्हेति॥
हे मातः रणे युद्धे देवशत्रून् जित्वा पराजित्य अपहृतानि यस्त्राणि शिर
स्त्राणि मुकुटानि यैः कवचिभिः असुरक्तवर्मभिः निवृत्तैः समस्ततः परावृ
त्तैः चंडस्य चंडेश्वरस्य यो अंशः भागः त्रिपुरहरनिर्माल्यं तत्र विमुखैः
शिवनिर्माल्यस्याभक्ष्यत्वात् विरिंचींद्रोपेंद्रैः ब्रह्मेंद्रविष्णुभिः शशि
शिशिरकर्पूरधवलाः शशिवत् शिशिरः शीतलो यः कर्पूरः तेन ध
॥६७॥ वलाः श्वेताः शशिशकलकर्पूरधवला इति पाठः। तत्र शशिशकलं चं
द्रखंडं कर्पूरश्च तद्धवला इत्यर्थः॥ तव मुखतांबूलशकलाः खंडाः वि
लुप्यंते॥ अहमहमिकया गृह्यंत इत्यर्थः। विष्णुपक्षे॥ मातः लक्ष्मीतः ॥६७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरत्नैः त्वदंकस्थितलक्ष्मीनिर्माल्यं परित्यज्य त्वन्निर्माल्यमुपाददत इत्यर्थः
यद्वा अमा अत इति पदछेदः। त्रिपुरहरे निर्माल्यविमुखैः अमा सह
यतः शशिशाकलकर्पूरधवला अतो विलुप्तं इति अर्थः। उपसमी
पे इंद्रो विद्यते यस्याः सा उपेंद्रा जयंतादिः॥ ६४॥ विपंच्या गायंती विवि
धमवदानं पशुपते स्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने॥ त्वदी
यैर्माधुर्यैरपलपिततंत्रीकलरवां निजां वीणां वाणी निचुलयति चोले
न निभृतं॥ ६५॥ विपंचेति॥ विपंच्या विणया विविधं नानाप्रकारं पुररिपोर्म
हेशस्य अवदानं निर्मलं चरितं गायंती वाणी सरस्वती निभृतं। यथात
था चोलेनोपरिछ्ववस्त्रेण वीणां लज्जया निचुलयति आछादयति त्व
ज्जा हेतुं वदन् वीणां विशिनष्टि त्वया चलितशिरसा कंपितशिरसा सा
धुवचने साधुवादे वक्तुं आरब्धे सति तदीयैः साधुवचनसंबंधिभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्मा धुर्यैरपल्लपितो निन्नतः तंत्रीणां कलरवो यस्यास्ता मित्यर्थः। विष्णुपक्षे
प्येवं॥ ६५॥ श्लोकः॥ कराग्रेणास्पृष्टं तुहिनगिरिणा वत्सलतया गिरीन्द्रो नो
दस्तं मुकुरधरपानाकुलतया॥ करग्राह्यं शंभोर्मुखमुकुरवृत्तं गिरिसु
ते कथंकारं ब्रूमस्तव चिबुकमौपम्यरहितं॥ ६६॥ कराग्र इति॥ हे गिरि
सुते तव चुबुकं कथंकारं केन प्रकारेण ब्रूमः वर्णयामः तत्र हेतुः औ
पम्यरहितं साद्दृश्य प्रति। योगिन उपमानस्य विरहात् तुहिनगिरि
णा हिमालयेन वत्सलतया पुत्रीस्नेहेन कराग्येण हस्ताग्रभावेन स्पृष्टं॥
गिरीशेन शिवेन अधरपानाकुलतया मुहुःवारंवारं उदस्तमुन्नो त्वितं
शंभोः शिवस्य करग्राह्यं करग्रहणयोग्यं मुकुरस्य मुखादर्शस्य वृत्तं दं
डमित्यर्थः॥ विष्णुपक्षे॥ तुहिनस्य हिमस्य गिरिः पार्वतो यत्रासौ तुहि
नगिरिश्चंद्रस्तेन कराग्रेण किरणाग्रेण स्पृष्टं हे वत्सल गिरिस्त्रा स्य

॥ ६८॥ ॥ ६८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महेशस्यादर्शनईश्वरतयाप्रसिद्धयालक्ष्म्याराधयावाअधरपानाकुलतयामु
कुंदस्तमुत्तोलितंशंभोः कल्याणजनकस्यसूर्यस्यकरग्रहणयोग्यंकम
लसदृशत्वादथवाशंकल्याणंभवत्यस्मादितिशंभोस्तवचुंबुकमित्यन्व
यः। करग्राह्यं अथलक्ष्म्याराधयावाकीदृशं चुंबुकं गिरिसुते कथंकु
रं गिरिसुतापार्वतीइलक्ष्मीस्तयोः कथमिदंस्पष्टमितिशब्दकारकं
औपम्यरहितंभ्रमइत्यन्वयः। गिरिसुतेइतिपर्वतदुहितृसंबोधनंवा॥
॥६६॥ श्लोकः॥ भुजाश्लेषान्नित्यंपुरदमयितुःकंटकवतीतवग्रीवाध
त्तेमुखकमलनालंश्रियमियं। स्वतःश्वेताकालागरुबहुलजंबालम
लिनामृणालीलालित्यंवहतियदधोहाररलतिका॥ टीका॥ भुजाश्लेषा
दिति। पुरदमयितुःशिवस्यभुजाभ्यामाश्लेषादालिंगनात् कंटक
वतीपुलकवतीतवेयंग्रीवामुखकमलस्यमुखारविंदस्यनालश्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं कांउ शोभां धत्ते। स्वतः स्वभावात् स्वेता कालागरुबहलजंबालेनव
च्छागरसमरूपं केनमलिनाहारलतिका। अहो आश्चर्यं येम्रिणाली
लालितं से बिसश्रीशोभां यद्यस्मादहति धत्ते। यदहो इत्सत्र तदधइत्य पिपा
ठः। तत्र तदधः। ग्रीवाया अधइत्यर्थः। विष्णुपक्षे। पुरस्य आग्नत्स्वे भ्रसु
षुप्स्य वच्छात्रयस्य रमथितुर्नोर्जिाकस्य तव भुजाश्लेषात् लक्ष्मीभुजा
लिंगनात् यद्वा कंटकवती ईदृतः तव ग्रीवेति पदच्छेदः। ईर्लक्ष्मीस्तत्र मि
ति युत्सूरेवकारोइ वार्थे उत्प्रेक्षा द्योतकः। नालत्रिय भियनंतरये
॥६१॥ ज्यः। अथवा ईर्लक्ष्मीस्तस्यां इतं लक्ष्म्यानुगतं विष्णुवातोति ईतवा
साम्या सौ ग्रीवा चेति भगवदाश्लिष्टा लक्ष्म्या ग्रीवेत्यर्थः। कीदृशी ॥६१॥
पुरमथितुस्तव भुजाश्लेषात् कंटकवतीत्यर्थः। श्रोषं समानं॥ ६७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्लोकः॥ गलेरेखास्तिस्रो गतिगमकगीतैकनिपुणे विवाहव्यानद्धत्रिगुण
गुणसंख्याप्रतिभुवः॥ विराजंते नानाविधमधुररागाकरभुवां त्रयाणां
ग्रामाणां स्थितिनियमसीमान इव ते॥६८॥ गलेरेखा इति॥ हे गतिगमकगी
तैकनिपुणे गतिस्तत्तत्स्वरूपज्ञानं तस्य गमकं ज्ञापकं संगीतशास्त्रं त
त्र यानि गीतानि तत्र निपुणे चतुरे वस्तुतस्तु गतिरागसंगीतगमकस्था
यिस्वरस्य पुनः पुनर्घोषणं गीतं समुचितार्थप्रबंधसंदर्भः तदुक्तं॥ ग
तिस्तु रागसंगीतं स आलापः प्रकीर्तितः॥ गमको मुख्यनादस्य परिभा
वोरस्यास्मकः॥ गीतं प्रबंधारूढार्थरंजितारक्तिश्लिष्यते इति॥ एतेषु ए
कनिपुणे परमचतुरे तव गले तिस्रो रेखा विराजंते शोभंते कीदृश्यः।
विवाहकर्मणि व्यानद्धो विशेषेण बद्धस्त्रिगुणो यो गुणः मंगलसूत्रं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रयात्रिवसंख्यातस्याः प्रतिभुवोनिर्नेम्यः। तदुक्तं ग्रंथेत्रिविधसीशस्रू
पेषु रंध्रवृत्तत्रितंतुकंत्रिरत्नं रुक्मीजंस्त्रीणां मंगल्याभरणं विदुरि
ति पाठोत्तरे विवाहार्थं व्यानद्धोबद्धोयः प्रगुण उरष्टो गुणास्तंतुस्त
स्ययासंख्यातत्प्रतिभुवस्तथ्यापिकाः यावज्जयं प्रतिवादिनोगु
णबंधनं कुर्वंतीत्याचार्यः नानाविधानां मधुराणां रागाणां षड्जम
ध्यमादि सप्तस्वरानुबद्ध वसंत गौड गूर्जर कर्णाटादिगीतानां आ
॥७०॥ कारउत्पत्तिस्तस्योभूमिरूपाणां त्रयाणां त्रिसंख्याकानां ग्रामा
णां षड्जमध्यमग्रामपंचग्रामाणां स्थितिनियमसीमानइव परस्प ॥७०॥
रकल्पहाविशानां ग्रामाणां स्थित्योनियमस्तदर्थं सीमानइवम
र्यादाचिन्हरूपाइवेत्यर्थः विश्रुपक्षे। गतिगमकेशादिगलस्यविशेषपां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेषं समानं ॥ ६८ ॥ श्लोकः ॥ मृणालीमृद्वीनां तव भुजलतानां च तरुणां च तु
र्भिः सौंदर्यं सरसिजभवः स्तौति वदनैः ॥ नखेभ्यः संत्रस्यन्मदनमथनादंध
करिपोस्तु र्णां शीर्षाणां सममभयहस्तार्पणधिया ॥ ६९ ॥ मृणालीति ॥
मृणालीवत् सरोजिन्यंकुरवत् मृद्वीनां कोमलानां च तरुणानां च तुः सं
ख्याकानां तव भुजलतानां बाहुवल्लीनां सौंदर्यं शोभां सरसिजभवः
म
ब्रह्मा चतुर्भिः वदनैः करणभूतैः स्तौति ॥ प्रथमदलनात् पंचमुखस्य
प्रथमकर्त्तनात् अंधकरिपोर्महेशस्य नखेभ्यः संत्रस्यन् बिभ्यन्
अवशिष्टानां च तुर्णां शीर्षाणां समं युगपदेव अभयस्य भीत्यभाव
स्य हस्तैरर्पणधिया दानबुध्या ॥ बिभ्रुपक्षेप्येवं ॥ ६९ ॥ श्लोकः ॥ न
खानामुद्योतैर्नवनलिनरागं विहसतां कराणां ते कांतिं कथय कथ
मं कथयामः कथमुमे ॥ कयाचिद्वा साम्यं भजतिकलया रक्तकमलं य

दि क्रीडालक्ष्मीश्चरणतललाक्षारुणदलं ॥७०॥ नखानामिति ॥ नखा
नां क्रूरजानां मुखोत्तैः प्रभाभिः नवनलिनरागं विहसतां नूतनच्छात
पत्रश्रीभ्रांतिरस्कुर्वतां ते तव कराणां कांतिं सौंदर्यं कथं केन प्रका
रेण अमी वयं कथयामः अमरूभिति पाठे कांतिविशेषणं पांडु मे इति
पाठे संबोधनं क्रीडंत्या विहरंत्या लक्ष्म्याश्चरणतललक्षया अरुण
दलं रक्तपत्रं यदि कदाचित्तदा कमलं कलया एकदेशेन साम्यं सौ
॥७१॥ दर्यं भजति धत्ते नान्यथेत्यर्थः ॥ कमलसाम्यं तव कराणां दूरेति
ष्ठतु कमलानामेव तव करसाम्यं कदाचित्कमिति भावः ॥ विद्रुमुप
क्षेप्येवं ॥ उमे इति पाठे उत्तमशोभा लक्ष्मीः प्रमाणवोपनिषद्रूपं वि ॥७०॥
धते यस्मिं स्त्वयि विद्यमानां तव कराणां कांतिं तवेयं कथं कथयामः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसन्वयः। उत्कृष्टंमानंयस्यतस्मिन्नुमेभ्रमंडलेइतिवाक्यार्थः।
॥७०॥श्लोकः॥समंदेविस्कंदद्विपवदनपीतस्तनयुगंतवेद
न्तः खेदंहरतुसततंप्रस्नुतमुखं॥यदालोक्याशंकाकुलित
तहृदयोहासजनकः स्कंधस्वकुंभौहेरंबःपरिमृशतिहस्तेन
झटिति॥७१॥समंदेवीति॥हेदेवीद्योतनशीलेसमंयुग
पदेवस्कंदःकार्तिकेयःद्विपवदनोगणेशस्ताभ्यांपीत
मास्वादितंसततंप्रस्नुतमुखंसदाक्षरत्क्षीरमुखंतव
स्तनयुगंनोऽस्माकंखेदंदुःखंहरतुनाशयतुयत्स्तनयु
गलमालोक्यआशंकयातर्केणाकुलितंहृदयंमनोयस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतएव हासजनकः स्तनयुगे स्वकुंभभ्रमात् हेरंबो गणेशः
स्वकुंभौ निजमस्तकौ हस्तेन स्पृशतिति शीर्षं परिमृशाति स्पृ
शाति तिष्ठति नवेति संदेहेन स्पृशातीति भावः। विष्णुपक्षे॥
स्हेरंब इति संबंधः हेमं देमंदो न्यूनः उः कामो यस्माद
सौमदेएउः अहस्वादिति संबुद्धौ सुलोपः हे देवी स्कंदद्वि
पवदनविगतः स्कंदो द्वीपवदनश्च यस्मात्स तथा तत्र वपीतं
॥७२॥ उदं स्तनद्वयं यशोदायाः नः खेदं हरतु शेषं समानं सुंद १२०२५
रीगोपालाभिप्रायेण वा स्तनवर्णनं॥७१॥श्लोकः॥अमर
तेवक्षोजानमृतरसमाणिक्यकलशौ न संदेहस्पंदो न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तौ

गपतिपताके मनसि नः॥ पिबंतौ यस्मादविदितवध्रसंभ्रमरसौ
कुमारावद्यापि द्विरदवदनक्रौंचदलनौ॥ ७॥ अमृते इति। हे न
गपतिपताके ते तव अमृतवक्षोजौ स्तनौ अमृतरससंस्यमाणि
क्यरत्नकलशौ भवतः अत्र नोऽस्माकं मनसि न संदेहस्य
स्पंदोलेशः यस्मात्कारणात् तौ वक्षोजौ पिबंतौ द्विरवदनक्रौं
चदमनौ गणाधिपतिस्कंदौ अद्यापि कुमारौ वस्तनामृत
पानादेवतयोर्नजरेति भावः। कीदृशौ अविदितवध्र
संगमरसौ अजातस्त्रीभोगसुखविषयर्थः। विश्रुपक्षे।
अमृद्विरदवदनक्रौंचदमनौ ते तव विराट्रूपस्य वक्षो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञौस्तनौवक्षः हृदयंअजौअजन्मनौइतिवाकीदृशौअमृतर
सस्यमाणिक्यकलशौयस्मात्सिबंतौवर्त्ततेतस्मादद्यापितौकु
मारौमनसिकीदृशोनगपतिपताकेनगानांपतिर्विष्णुःसए
वपताकायत्राःस्व्यापकोयस्मिन्नितिअर्थः॥८२॥श्लोकः॥ ॥८३५
वहस्यंबस्तंबेरमवदनकुंभप्रभृतिभिःसमारब्धांमुक्ताम
॥८३॥ णिभिरमलांहाररलतिकां॥कुचाभोगोबिंबाधररुचिभि
रंतःशबलतांप्रतापव्यामिश्रांपुरविजयिनःकीर्त्तिरिव
ते॥८३॥वहस्यंबेति॥हेअंबमातःतवकुचाभोगःमुक्ता
मणिभिःसमारब्धांघटितांअमलांनिर्मलांहाररलतिकां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वहृतिमणिभिः कीदृशैः। स्तंबेरमदनुजकुंभप्रस्रुतिभिः स्तंबे
व२ रमदनुजो गजासुरः तस्य कुंभस्य प्रसृतिः जन्मस्थानं ये
षां तैः तथा बिंबाधररुचिभिः अधरबिंबकांतिभिः अं
तर्मध्ये ज्ञो बलितां भिन्नव पद्मरक्तां कामिव प्रतापेन लोहित
वर्णेन व्यामिश्रां संगतां पुरविजयिनो महेशस्य स्फुभ्रां
कीर्तिमिव तथा च गजासुरमारणेन यः शिवस्य प्रतापो
स्त याच। कीर्तिमिव तैः थां चैतत्वकुचाभोगो बिभर्तीति भावः।
विघ्नुपक्षे॥ हे अंब जगन्नेत्रजगज्जनकवात्रीणि अंबकानि
नेत्राणि यस्य त्रयाणां लोकानां अंबकः पितेत्यमरादिटी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारुद्भिस्त्र्यंबकपदव्याख्यानात् शेषं समानं ॥८३॥ श्लोकः ॥
तव स्तन्यं मन्ये धरणिधरकंन्ये हृदयतः पयःपारावारः प
रिवहति सारस्वत इव ॥ दयावत्या दत्तं द्रविडशिशुरास्वा
द्य तव यत्कवीनां प्रौढानामजनि कमनीयः कवयिता ॥८४॥
तव स्तन्यमिति ॥ हे धरणिधरकंन्ये तव स्तंन्यं स्तनोद्भूतं दु
॥८४॥ ग्धं हृदयतः सारस्वतः सरस्वतीसंबंधी पयःपारावारः क्षी ॥८४॥
रसमुद्रः परिवहती मन्ये। दयावत्या त्वया दत्तं यत् स्तंन्यं त
व द्रविडशिशुर्मल्लक्षणः आस्वाद्य प्रौढानां कवीनां मध्ये क
मनीयः उत्कृष्टः कवयिता कविरजनि जात इत्यर्थः॥ अत्र ए

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैकांचीदेशेऋषिशापात्दरिद्रब्राह्मणगृहे स्कंदोवतीर्णः
सचपितरिदेशांतरंगते मातरिचपानियानयनार्थंग
तायाषण्मासवयस्कः प्रांगणेक्षुधेयारुदन्नासीत्ए
तस्मिन्नेवकालेआकाशेशिवेनसहशिवयातिकारुण्या
द्भूतलमागत्यस्तन्यमस्मैदत्तांतर्हितंसचतदवधिमहा
कविर्जातइतिकिंवदंति॥ विष्णुपक्षेतु॥ हेधरणिधरकं
न्येधरणिधरकन्याया॥ इः कामोवांछितंयस्मात्सतथा॥
एवंरुस्वादिसुलोपः॥ तवहृदयतः हृदयेदयावतिकरु
णाशालिनिआदत्तंस्तन्यंस्तनोचितहाररूपंवस्तुसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रस्वतः पयःपारावारः कमनीयः परिवहतीति मन्ये॥ यस्त्व
न्यं हाररूपं वस्तुत वद्रविड शिशुरास्वाद्य ध्यात्वा कवियेता
जनि श्रियर्थः॥ यद्वा दयावयाथ यशोदया दत्तं स्तन्यं तव हृदय
तोवहतीति सारस्वतः पारावार इव मन्ये॥ द्रविड शिशुं रा
तीति द्रविड शिशु रा पार्वती रूपा यशोदायाः कन्या यत्तु स्त
न्यं आस्वाद्य प्रौढानां कवीनां इतो अनुगता अनुकूला अज
॥८६॥ निहे कवे॥ ७४॥ श्लोकः॥ हरक्रोधज्वालावलिभिरवलीढेन वपुषा गभीरे ते नाभी सरसि कृत संगो मनसिजः॥ ॥८५॥
समुत्तस्थौ तस्मादचलतनये धूमलतिका जनस्तां जानीते जननि

नवरोमावलिरिति॥७५॥ हरक्रोधेति॥ हे अचलतनये पर्वतपु
त्री हरक्रोधज्वालावलिभिः शिवकोपपावकज्वालासमूहैः
अवलीढेन व्याप्तेन वपुषा शरीरेण मनसिजः कंदर्पः स्वरक्षा
र्थे तव गभीरे नाभिसरसि कृतः संगः आत इति शेषः। तस्मा
न्नाभिसरसः धूमलतिका कांचन समुत्तस्थौ तस्याः पि
उसंयोगेन जलाद्भूमोत्पत्तेः॥ तां धूमलतिकां तव रोमावलिरिति
जनो जानीते॥ जननीति संबोधनं। विष्णुपक्षे॥ नाभिसरसि
कीदृशो अचलतनये न चलति वेदमार्गादिति अचलः ब्रह्मा
स एव तनयो यस्य तस्मिन् नाभि तएव ब्रह्मणाऽस्पतेः। जनन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुसतिरस्यास्तीतिजननीचतद्रोमचेतिजननिरोमतस्यावलिः
समूहः तत्तनरोमावलीत्यर्थः॥ जननीतिएवं वद्विभुसंबोध
नं॥८५॥श्लोकः॥ यदेतत्कालिंदीतनुतरतरंगाकृतिशिवे
कृशेमध्ये किंचिज्जननितवतद्भाति सुधियां॥ विमर्दा
॥८६॥ दन्योन्यंकुचकलशयोरंतरगतंतनूभूतंव्योमप्रविशदि
वनाभींकुहरिणीं॥८६॥ यदेतदिति॥ हेशिवेहेजननि ॥८६॥
तवकृशेमध्येकालिंद्याःयमुनायाःतनुतनोतिसूक्ष्मोय
स्तरंगावीचिस्तदाकृतितदनुकारियदेतत्किंचिन्नीले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेखासकंवस्तुतत् अन्योन्यंपरस्परंकुचकलशायोः विमर्दात्
संघर्षणात् तन्नम्रतं च पक्षे म्रतं व्योम आकाशं कुहरिणी अ
भ्यंतरगंभीरदेशयुक्तां नाभीं प्रविशद्दिव सुधियां भातीत्य
र्थः। विष्णुपक्षे। तत्र मध्ये त्रिवेशोभने व्योम कीदृशं जनन
मुत्पादनमस्यास्तीति जननी जगज्जनकमित्यर्थः। जननीति
एवं विष्णुसंबोधनं। अन्योन्यं लक्ष्मीनारायणयोर्विमर्दा
त् आलिंगनात्तन्नम्रतं कुचकलशायोरर्थात्तु लक्ष्म्या अं
तरगतं मध्यवर्त्तिशेषं समानं॥ ७८॥ श्लोकः॥ स्विद्गंगा

वर्त्तः स्तनमुकुलरोमावलिलताजलावालं कुडंकुसुमत्रा
रतेजोकृतभुजः ॥ रतेलीलागारं किमपितवनाभीतिगिरि
जेबिलद्वारं सिद्धेर्गिरिशनयनानां विजयते ॥७॥ स्थि
रो गंगावर्त्त इति ॥ हेगिरिजे तव नाभी इति अनेन प्रकारे
ण विजयते सर्वोत्कर्षेण वर्त्तते प्रकारमेव स्थिरः स्थैर्य
॥७८॥ शाली गंगायाः आवर्त्तः भ्रमः तथा स्तनावेव मुकुलौ यस्याः
सा स्तनमुकुला सा चासौ रोमावली लता रोमराजी ॥७८॥
रूपिणी वल्ली तस्यां जलावालं जलधारणार्थं गर्त्त
विशेषः निजावालमिति क्वचित्पाठः ॥ निजं स्वीयं आवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लंत देव॥ स्यादादवालमावालमावाप्पोथनदीसरिदित्यमरः॥ तथा
कुसुमशरः कामस्तस्य तेजो कृतभुजः प्रतापाग्नेः कुंडं अग्न्यालयः
तथा रतेः कामपत्न्याः किमप्यनिर्वचनीयं लीलागारं क्रीडामं
दिरं तथा गिरित्रानयनांमानंदरूपायाः सिद्धेः कारणीभूतं बि
लद्वारमित्यर्थः॥ विष्णुपक्षे॥ हे गिरिजे गिरिजायाः पार्वत्याः इः
कामो वांछितं यस्माद्विः पक्षी गरुडस्तं लासयनुगृह्णातीति हे बि
लयद्वारि गिरिजा पार्वती ईः लक्ष्मीः विः गरुडः तान्लासयनुगृ
ह्णातीति गिरिजे बिल गिरित्रानयनानांसिद्धेः कामभस्मीकर
णहूर दत्रानादिरूपायाः द्वारं त्वन्नाभिध्यानादेव हूर दत्रानादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धिर्महेशस्येतिभावः शेषंसमानं॥७७॥श्लोकः॥निसर्गक्षीण
स्यस्तनतटभरेणक्लमजुषोनमन्मूर्तेर्नाभौवलिषुशनकैस्त्रु
ट्यतइव॥चिरंतेमध्यस्यत्रुटिततटिनीतीरतरुणासमावस्था
स्थेम्नोभवतुकुशलंशैलतनये॥७८॥निसर्गेति॥हेशैलतनये
॥७८॥ तेतवमध्यस्यकुशलंभवतुकीदृशस्यनिसर्गेणस्वभावेन
क्षीणस्यकृशस्यतत्रापिस्तनतटभरेणकुचाभोगभारेणक्ल
मजुषःक्लेशयुक्तस्यतेतवनमन्मूर्तेर्भारसहिष्णुताविरहेण ॥७८॥
प्रह्वीभूतवपुषःनाभौवलिषुशनकैर्मंदंमंदंत्रुट्यतइवत्रुटि
तश्चासौतटिनीतीरतरुश्चतेनसमासमानाअवस्थादशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्याः स्छुमास्थितिर्यस्येयर्थः॥ विष्णुपक्षे॥ हे शैलतनये शैलत
नयायाः ई: लक्ष्मीः संपत्तिर्यस्मादित्यर्थः॥ यद्वा शैलतनयेय
स्य मैनाकस्य ई लक्ष्मीर्यस्य स तथा उभयोः समुद्रशायिना
तु अथा लक्ष्मीर्हरेः सुंदरि गोपालस्य वा वर्णनाभिप्रायेणा
स्तनतटभरणोत्यादि स्तनवत् तटं विद्यते यस्याः सा स्तनतटे
गोवर्द्धन इति वा शेषं समानं॥ ७८॥ श्लोकः॥ कुचौ सद्यो नि
यंस्तटघटितकूर्पासभिदुरौ कषंतौ दौर्मूलं कनककल
शाभौ कलयतं॥ तव त्रातुं भंगादलमिति विलग्नं तनुभवा
त्त्रिधानद्धं देवी त्रिवलिलवलीवल्लिभिरिव॥ ७९॥ कुचौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्यइति॥ हेदेविसद्यस्तत्क्षणादेवस्विद्यतोः यौवनोष्मणाशिव
विषयकानुरागेणनास्वेदंमुंचतोस्तटयोर्धृष्टितस्यनिवे
शितस्यकूर्पासिस्यचीनांशुककंचुकस्यभिदुरैर्भेदनशी
लौदोर्मूलंबाहुद्वैमूलद्वयंकर्षंतौव्याप्नुवंतौतवकुचौकन
ककलशाभौस्वर्णकुंभप्रतिमौकलयताजानतासानुभवा
॥७९॥ कंदर्पेणापिअवलग्नंउदरंभंगात्रातुंरक्षितुंत्रिवलिलवल्ली
॥वल्लिभिःतिसृभिर्मध्येरेखाभिरेवलवल्लीसंज्ञाभि ॥८९॥
र्वल्लिभिर्लताभिःबद्धमिवेत्यर्थः॥ विप्नुपक्षे॥ कांतायाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुचौकनककलशाभौउमन्मथबीजपरिपूर्णकुंभद्वयसमौमद
हेतुकलयताजानतातनुभुवातनुःशरीरंभरआश्रयोयस्य
तेनजीवेनतवउदरंत्रिधाश्रवणमननंनिजध्यासनरूप
प्रकारत्रयेणत्रिवलिलवलीवल्लिभिरिवबद्धंमनसीति
शेषः॥ध्यातमित्यर्थः॥किमर्थंभंगात्भ्रंशात्अवलंबंतत्रैवसं
बद्धंआत्मानंत्रातुंउदरंकीदृशंदेवोब्रह्माअस्मिन्नस्तीतिदेवि
द्रनंतनपुंसकमिदंअथवातनुभुवास्वशरीरोत्पन्नेनब्रह्मणा
अवलंबंसंयुक्तंदेविसकलदेवाश्रयमित्यर्थः॥८०॥श्लोकः॥
गुरुत्वंविस्तारंक्षितिधरपतिःपार्वतिनिजान्नितंबादाछिद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयिहरणरूपेणानिदधे॥अतस्ते विस्तीर्णो गुरुरयमशेषां वसु
मतीं नितंबप्राग्भारस्थगयति लघुत्वं नयति च॥८०॥गुरुत्व
मिति॥हे पार्वती क्षितिधरपतिर्हिमालयः निजात्स्वकीयान्नितं
बात्कटकप्रदेशात् गुरुत्वं विस्तारं च आछिद्य पृथक्कृत्य
॥८०॥ वयि भवत्यां हरणरूपेण विवाहसमये दायरूपेणानिदधे
निवेशितवान् विवाहादिषु यद्द्वयं सदायो हरणं च तद्दि ॥८०॥
यमरः॥अतो हेतोस्ते नितंबप्राग्भारः जघनभारः प्राग्भा
रश्चैव भारश्च तथा अतः समार्थक इति विश्वकोशः॥विस्ती
र्णः गुरुर्गौरवशाली अशेषां सर्वां वसुमतीं पृथ्वीं स्थगयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आघ्राद्यतिलघुत्वंलाघवाधारतांचनयतिप्रापयतीत्यर्थः॥विष्णुप
क्षे।गुरुत्वंक्रीडत्तांपर्वतस्येदंपार्वतिञिप्रत्ययांतनपुंसकपद
मेतत्॥त्वयिगुरुत्वंनिदधेहरणरूपेणहरणंमनोहारिरूपं
यस्याःसाहरणरूपालक्ष्मीस्तस्याःहेनईश्वरतवेगायने
कारणेणकरयोःश्लेषभेदहरणरूपईनइतिसंबोधनदृश्य
वातेतववामनमस्तैःशेषंसमानंविष्णोःशक्तिरूपतया
नितंबोपादानं॥८॥श्लोकः॥करीन्द्राणांशुंडाकनककद
लीकांडपटलीमुभाभ्यामूरूभ्यामुभयमपिनिर्जित्यभ
वती॥सुवृत्ताभ्यांपत्युःप्रणितकठिनाभ्यांगिरिसुतेवि ६४

र्जिग्ये जानुभ्यां विबुधकरिकुंभद्वयमपि॥८३॥ करींद्राणामिति॥
हे गिरिसुते उभाभ्यां ऊरुभ्यां करिणामैरावतादीनां शुंडा
हस्तान् तथा कनककदलीस्वर्णरंभास्तस्याः कांउपटलीं
स्तंभसमूहं दरस्तूभायमपि निर्जित्य सुवृत्ताभ्यां शोभनप्र
कारेण वर्तुलाभ्यां पस्समर्ह हेशास्य प्रणितिभिः कठिनाभ्यां
॥८१॥ जानुभ्यां विबुधकरिकुंभद्वयमपि ऐरावतमस्तकयुग
लमपि भवती विजयतीत्यर्थः॥ विष्णुपक्षे॥ गिरिसुतायाः ॥८१॥
द्रः कामः वांछितं ई लक्ष्मीः स पतिर्वा यस्मात् हे गिरिसुते भ
वति त्वयि विद्यमाना ई लक्ष्मीः शोभा उभयमप्यूरू निर्जित्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विबुधकरिकुंभद्वयमपिविजिग्येइत्यर्थः॥ विबुधकरिणःपत्यु
रिंद्रस्यप्रणत्यापिकठिनाभ्यांविबुधकरिकुंभद्वयजयस्या
गरहिताभ्यामित्यर्थः॥ शेषंसमानं॥ ८१॥ ॥श्लोकः॥ पुराजे
तुंरद्रं द्विगुणशरगर्भौ गिरिसुते निषंगौजंघे ते विषमविशि
खबाढमरत॥ यदग्रेदृश्यंते दशशरफलाःपादयुगलि
नखाग्रछद्मानःसुरमुकुटशाणैर्घनिशिताः॥ ८२॥ पुराजे
तुमिति॥ हेगिरिसुते पुराएवंरुद्रंशिवंजेतुंविषमविशिख
कामस्तेतवजंघेद्विगुणशरगर्भौस्वयंपंचबाणत्वात्तावद्भिः
शरैरजयोग्यमितिद्विगुणानेवनिजपंचबानान्विधायत

॥८२॥

भौनिषंगौतूणीरौबाद्ढं निश्चयेन अद्भुत रत्नवान्‌ यदग्रेययो
रनंगनिषंगतामापन्नयोर्ध्वजियोरग्रे पादयुगलीनखाएवध
मव्याजोयेषांतेपादयुगलीनखाग्रघमानः दशाग्रारफला
दशासंख्याकबाणाग्रभागाः दृश्यंते॥कीदृशाः सुरसुकुटश्रा
णोकनिशिताः नमस्कारसमयेमहेंद्रादिमुकुटकोटिषु
शाणघर्षणालएकनिशिताः मुख्येतयातीक्ष्णाइत्यर्थः॥वि
धुपक्षे॥गिरिसुतायाः इः कामः ईलक्ष्मीः वायस्मादिति
संबोधनपदार्थः॥शेषंसमानं॥८२॥श्लोक॥श्रुतीनांमू
र्द्धानोदधतिलवयौश्रोरवरतयाममाप्येतौमातःशिरसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दययाधेहि चरणौ ॥ ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी ययोर्ला-
क्षालक्ष्मीररुणहरचूडामणिरुचिः ॥ ८३ ॥ श्रुतीनामिति ॥ हे मातः श्रु-
तीनां वेदानां मूर्द्धानो अंतभागाः उपनिषल्लक्षणाः यो तव चरणौ कर्मणि
शेखरतया उत्तंसरूपेण दधति वहंति सर्वासां श्रुतीनां शेखररूपा
तात्पर्यात्तु एतौ चरणौ मम अपि शिरसि दयया करुणया धेहि निधे-
हि ययोश्चरणयोः पाद्यं पाद्यरूपं पाथः जलं पशुपतिर्जटाजूट-
तटिनी गंगा तथा ययोश्चरणयोर्लाक्षालक्ष्मीर्याक्षिकसंपत् अरु-
णा रक्तो हरेः विष्णोः यश्चूडामणिः मुकुटरत्नं तस्य रुचिः दीप्ति-
रित्यर्थः ॥ विष्णुपक्षे ॥ मातः इत्यत्र मा अत इति पदच्छेदः दययाअ-
धेहीति च पदच्छेदः अतो हेतोर्मम अपि शिरसि मा अधेहि अपि

॥८३॥

तु धेहीत्यर्थः ममापि शिरसि मातः परिमानं श्रा म्रुलइति द्विवचनां
तं वाययोः पाद्यमिति वामनस्य तृतीय चरणोपरि ब्रह्मणा एजा
र्थं यस्याद्यमावर्जितं से वं गंगेति पुराण प्रसिद्धेः हरिरिंद्रः श्रोषेस
मानं ॥८३॥ श्लोकः ॥ हिमानी हंतव्यं हिमगिरितटा क्रांतरुचिरौ
नितांतायां निद्राणं निशि चपरभागे च विशदौ ॥ परं लक्ष्मी पा
त्रं श्रियमपि सृजंतौ समयिनां सरोजं त्वत्पादौ जननि जयत
श्चित्रमिह किं ॥८४॥ हिमानीति ॥ हे जननि त्वत्पादौ समग्रगु
णासंपन्नौ न्यून गुणं सरोजं जयत इति किंचित्रं न किमपीत्य
र्थः ॥ कीदृशं सरोजं हिमानी हंतव्यं तुहिनसमूहेन नष्टकांति
तव चरणौ हिमगिरेस्तटाक्रांतावपि कटकसंचारेपि रुचिरा

॥८३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतूपहतश्रीभीतथासरोजंनिशायांरात्रौनिद्राणंमुद्रितंपादौतु
निशिरात्रौपरभागेदिनेचविशदौनिर्मलौपरभागेनेतिपाठेरा
त्रौपरभागेनविरुद्धकांतिसंसर्गेणविशदौनिर्मलौरात्रौस्त
मोबहुलत्वेनश्यामत्वात्चरयोःसहजपाटलकांतिसंबंधाद्वि
रुद्धत्वंपरभागोभवेद्वर्णद्वयसंसर्गजातरुचिरित्यभिधानात्तात
थासरोजंपरंकेवलंलक्ष्म्याःश्रियःपात्रमवस्थितिःस्थानंनतु
तस्यादानेभोगेवासमर्थंत्वत्पादौतुसमयिनांत्वद्भक्तिमार्ग
प्रवेशिनांश्रियमैश्वर्यंसृजंतौददावित्यर्थः॥विष्णुपक्षे॥जन
निनांसमस्तजीवानांजयतःपराजयतःत्वत्पादावुत्फुल्लक्ष्णोस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोजं चोक्तलक्षणमितिकिंचिमिस्यर्थः॥८४॥श्लोकः॥नमोवाचंद्र
मोनयनरमणीयायपदयोस्तवास्मैद्वंद्वायस्फुटरुचिरसा
लत्कवते॥अस्यस्पर्शं तंयदभिहननायस्पृहयतेपश्यन्नामि
म्नानःप्रमदवनकंकेलितरवे॥८५॥नमोवाचामिति॥तवेअ
स्मैपदयोर्द्वंद्वायनमोवाचंनमइतिवचनंक्रमःवदामः।की ॥८४॥
॥८४॥ दृत्रायनयनयोःरमणीयायलोचनानंदजनकायतथास्फु
टरुचिरसालत्कवतेस्फुटौरुचिरसोकांतिद्रवोयस्यता
दृशोलत्कवतेइत्यर्थः।यदभिहननायचेनपदद्वंद्वेनाभि
हननंअशोकश्चरणाघाताज्जायतेपुष्पवत्तरइतिवचनात्
दोहदरूपंताडनंतस्मैस्पृहायतेस्पृहांकुर्वतेप्रमदवनेलीलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घानं तत्र यः कंकेलितरुरशोकवृक्षस्तस्मै कंकेलि कामकेलिः स्या
दशोके रक्तपुष्पके इति विश्वः। पक्षेनां जीवानां ईशानः शिवः अ
सं तमस्यति मात्सर्यं करोति त्वच्चरणस्पर्शसुखं कथमन्येना
पि लभ्यमित्याशयेनेति भावः। विष्णुपक्षे॥ स्फुटरुचिरसालक्त
कवते प्रकाशमानकांतिद्वारा वासकयावकयुक्ताय यस्य पदद्वं
द्वस्य अभिहननाय पल्लवद्वारा अधिककांतिं मन्यतयातिर
स्काराय स्पृहयते अशोकवृक्षाय शिवो अस्यति कथमयं क्षु
द्रो मदाराध्यस्य भगवतश्चरणद्वंद्वस्पर्शशोभां तिरस्कर्तुमुद्य
तइत्याशयेनेति भावः॥८५॥ श्लोकः॥ मत्पार्श्वे त्वां गोत्रस्खल
नमथवैलक्ष्यनमितं ललाटं भर्त्तारं संचरणकमले ताडयतिते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिरादंतःशल्यं दहनकृतमुन्मीलितवता तुलाकोटिक्वाणैः किलि
किलितमीशानरिपुणा ॥८६॥ एषा स्खलेति ॥ लेतव चरणकमले
भर्त्तारं शिवं ललाटे ताडयति सति तुलाकोटिक्वाणेनूपुरध्व
॥८५॥ निभिः ईशानरिपुणा कामेन किलिकिलितं रोषेण गर्जितं
जितशात्रवदर्पस्य प्रतिज्ञापूरणीकृतः वीरस्य गर्जितं सिंहना ॥८५॥
दः किलिकिलातथेति विश्वः ॥ भर्त्तारं कीदृशं एषा मिथ्यैव गो
त्रस्खलनं त्वदन्यस्त्रीणां नामग्रहणं कृत्वा ॥ अथानंतरं वैलक्ष्ये
न लज्जावशेन नमितं नम्रं ईशानरिपुणा कीदृशेन चिराद्ब
हुकालमारभ्य दहनकृतं शिवललाटलोचनानलसंपादि
तं शल्यं दुःखं उन्मीलितवता दूरीकुर्वता उन्मीलितवतेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाठेआविःकृतवतापूर्ववैरस्यनिष्क्रयंकुर्वतेत्यर्थः।विष्णुपक्षे।
चरणकमलेभृंगोभ्रमरेणांबुजेलभिंदुंलातिअनुगंछतीतिल
लःविष्णुस्तमटतिउपसर्पतीतिललाटाईलक्ष्मीस्तस्याःभर्ता
रंविष्णुंवांताउयतिसतिदहतिप्रलयकालेजगदितिदहनोम
हारुद्रस्त्वंकृतंअंतःशल्यमपमानरूपंउन्मीलितवतातेत
वईशानरिपुणाभृगुणाहेअतुलदेवांतरैरतुलआसंबोधने
कोटिकाणेःकोटिशब्दैःकिलिकिलितंगर्जितंललाटेभर्तारि
कीदर्शंस्खलनंस्वमागभिन्नरूपंअत्रअस्मिन्भृगोरा
गःअपराधःसूषास्त्वातेवायमपराधोनभवतीत्याद्दिवच
नेनापराधक्षांतिंकृत्वाअथानंतरंवैलक्ष्येनमदीयकठिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृदयाभिघातेनतवचरणकमलमितिकोमलंव्यथितमितिवि
षादाविःकारणानिमितंनम्रमित्यर्थः॥अत्रएवंभृगुब्रंह्मविष्णु
रुद्राणांमध्येकः श्रेष्ठतइतिजिज्ञासितुंब्रंह्मणोनिंदांवाततो २
पमानंप्राप्यरुद्रनिकटेगतः तेनालिंगितुमारब्धेन भवान्
पिशाचादिसखः स्मशानवासिनमयालिंगनीयइतितन्नि
॥८६॥ दामकरोत् ततस्त्रिशूलेनरुद्रेणाभिहतोवैकुंठेलक्ष्म्यास ॥८६॥
हसुप्तस्यविष्णोर्वक्षसिचरणेघातमदात् ततोभगवता
सबहुमानं अहोकठोरेमदीयेवक्षसितपोदुर्बलस्यतव
पादस्यत्रयेमहद्दुःखमुपजनयिष्यतिइतिअभिधाय
तत्सादसंवाहनमारब्धंततोतिक्षमावंतंलक्ष्मीकांतमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वाधिकं भृगुरमस्त्वेति पौराणिकी कथा ॥ ८७ ॥ श्लोकः ॥ पदं ते कीं
तीनां प्रपदमपदं देवि विपदां कथं नीतं सद्भिः कठिनकमठी
खर्परतुलां ॥ कथं वा हस्ताभ्यामुपयमनकाले पुरभिदा यद
दायन्यस्तं दृषदि दयमानेन मनसा ॥ ८८ ॥ पदं ते कीर्तीनामि
ति ॥ हे देवि ते प्रपदं पदाग्रं कीर्तीनां पदं स्थानं विपदामपदं अ
वस्थानं कठिनायाः कमठी कच्छपी तस्याः यत्खर्परं पृष्ठकपा
लं तस्य तुलां साम्यं सद्भिः कथं नीतं प्रपदस्यातिलोमलत्वादि
त्यर्थः ॥ अतिकोमलत्वे च उपयमनकाले विवाहसमये दयमा
नेन दयायुक्तेन मनसा कारणभूतेन पुरभिदा शिवेन बाहु
भ्यामादाय दृषदि विवाहकर्मोचिते पाषाणे तत्प्रपदं कथं न्यस्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिसथः॥ विद्यमुपक्षे॥ देवा अस्मिन् संतीति देविसक्त देवा
श्रयमितिप्रपदविशेषणं दषदि रत्न रसिंहासन रूपेउप
यमनकाले दर्शनार्थमागतस्य विष्णोरतिदययारत्नसिं
हानेप्रपदं शिवेनस्थापितमित्राशयः॥ ८७॥ श्लोकः॥ नखैर्नाकि
स्त्रीणां करकमलसंकोचशात्रिभिस्तरूणांदिव्यानां हसत
इवतेचंडिचरणौ॥ फलानिस्वस्थेभ्यः किसलयकराग्रेपाद
दतां दरिद्रेभ्योभद्रां श्रियमनिशमन्हायददतौ॥ ८८॥ नखैरि
ति॥ हेचंडितेचरणौनखैःदिव्यानां तरूणां कल्पवृक्षाणांहस
तद्रुव गुणौ स्वस्यगुणाधिक्यादितिभावः॥ तरूणामितिकर्म
णिषष्ठी नखैः कीदृशैः नाकस्त्रीणांदिव्यांगनानांकरकमल

॥ ८७॥ ॥ ८७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संकोचितहस्तपंकजमुकुलीकरणोद्यातिभिर्भ्रंशायमानैप्रणाम
समयइतिभावः हास हेतुमाह। फलानीति॥ किसलयकराग्रेण
नवदलरूपहस्ताग्रेणस्वस्थेभ्यः स्वर्गस्थितेभ्यः अथचधना
दिमत्तयासुखिनेभ्यः फलानिददतांतरूणामियस्यविशेषणांच
रणोविशिनष्टिदरिद्रेभ्यःदुर्गतेभ्यः भद्रांसंपूर्णांश्रियंलक्ष्मीं
अनिशंनिरंतरं अंन्हायसपदितिददतौप्रयच्छतौइत्यर्थः। विधु
पक्षे॥ चंडाः प्रचंडाः फलदानेरुद्रादयोदेवाअस्यभक्ताः संतीति चंडीचंडीचासोचरणाश्चेति चंडिचरणतो चंडिचरणौ
प्रोदफलददेवाश्रितावित्यर्थः। शेषंसमानं॥ ८८॥ श्लोकः॥
कदाकालेमातः कथयकलितालक्तकरसंपिबेयंविद्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धौतं तव चरणनिर्णेजनजलं ॥ प्रवृद्धा मूकानामपि च कविता
कारणतया यदा दत्ते वाणीमुखकमलतांबूलरसतां ॥ ८ ॥
कदा काल इति ॥ हे मातः कथय विद्यार्थी सन् तव चरणा
निर्णेजनजलं चरणक्षालनजलं कदा काले कस्मिन् काले ।।८८।।
।।८८।। पिबेयं कीदृशं कलितः संक्रांतः प्रक्षालनवेलायां मलक्त
करसो यस्मिन् तत् प्रवृद्धा स्वभावतएव मूकानां वक्तु
मशक्तानां कवितायाः काव्यस्य कारणतया हेतुतया यत्
जलं वाण्याः सरस्वत्याः मुखकमले तांबूलरसतां वदनक
मलतांबूलरागशोभां आदत्ते करोतीत्यर्थ इति केचित् ॥ वि
धुपक्षे ॥ मातः लक्ष्मीतः कलितोऽलक्तकरसो यत्र तत् इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्भेजनजलविशेषणंकौतुकेन लक्ष्म्या अलक्तकरसो दत्त इत्यर्थः
मातःलक्ष्मीतः लक्ष्म्या दत्तं यज्जलं तांबूलरसतां वाणी आदत्त इ
त्यनेनान्वयो वा यद्वा सार्वविभक्तिकस्तसिल। मातःलक्ष्मीः वाण्या
मुखकमलतांबूलरसतां अदत्त इत्यर्थः॥ लक्ष्मीवाणीश्च मुख
कमलतांबूलरसतां आदत्ते इति वार्थः। यद्वा अमा अत इति
पदच्छेदः। प्रकृत्या प्रकृतिरूपया भवान्या अमा सह वाणी सर
स्वती मुखकमलतांबूलरसतां यद्यस्मादादत्ते अतो हेतोक
दा काले पिबेयमित्यर्थः॥ ८०॥ श्लोकः॥ पदंन्यासक्रीडापरिचय
मिवालब्धुमनसश्चरंतस्ते खेलंभवनकलहंसा न जहति॥ स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८१॥

विक्षेपेशिक्षां सुभगमणिमंजीररणिते घलादाचक्षाणं चरण
युगलं चारुचरितं ॥१॥ पदंन्यासेति ॥ तेतव चरणयुगलं
खेआकाशेअलमतिशयेन चरंतः संचरंतः भवनकलहं
साः गृहराजहंसाः नजहति नत्यजंति कीदृशाः पदंन्यासक्री
डापरिचयं चरणविन्यासे लीलाभ्यासं आसमंतात् लुभुम
नोमुषां ते आरभुमनसइव चरणयुगलं कीदृशं सुभग
स्य मनोहरस्य मणिरंजितस्य रत्ननूपुरस्य यत् रणितं त
स्य घलालुकपटात् स्वस्य चरणस्य विक्षेपे विन्यासे शिक्षां
आचक्षाणं ब्रुवाणं पुनः कीदृशं चारुचरितं मनोज्ञसंचारं

॥८१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरितंतुचरित्रेस्यात्संचारेप्रतक्रमणिइतिविश्वः।चारुचरिते
तिपाठेसंबोधनं।विद्युत्पक्षे॥स्वविक्षेपकालेचारुचरितेउत्क्र
ष्टगमनरूपचरित्रेशिक्षामाचक्षाणामिसन्वयः॥शेषंसमानं॥
वस्तुतस्तुभवनश्रीचक्रेपक्षएजायंत्रेकेलोग्व्यत्क्रमधुरः
हंसइतिमंत्रःकंठेयेषांतेकलहंसाब्रह्मादिदेवताःतेचरण
कमलंचरणंअज्ञानभक्षककमलंसंकोचविकासत्वात्शालिद्वै
तप्रपंचजगद्द्वैतात्मकब्रह्मरूपद्वैताद्वैतपदद्वंद्वमितिकुला
र्णववचनात्॥नजहतिनत्यजंतिपदानिस्थानानिचतुर्दशभु
वनानितेषांन्यासःसृष्टिःक्रीडारक्षापरिचयःसंहारःआल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चुं कर्त्तु मनो येषां ते तथा रुरुष्वादि करणसामर्थ्यप्राप्त्यर्थं त्वच्च
रणोपासनां कुर्वंतीत्यर्थः। रेवे हृदा कात्रो त्वच्चरणं चरंतः आस्वा
दयंतः ध्यायंत इत्यर्थः। शोभनश्चासाव विक्षेपश्चेति स्वविक्षे
॥९०॥ पो निर्विकल्परूपं ब्रंसत्तानं तस्मिन् शिक्षां आचक्षाणं की दत्रो
चारु चरिते मोक्षदाने रूप शोभन चरित्र युक्ते॥ भवानी पक्षे॥
संबोधनपदमिदं॥ सुष्ठु भगं ऐश्वर्यमस्यास्तीति सुभगइभ्वे ॥९०॥
रः मणिवत् मंजु करोतीति मंजी जीवः टिलोपे इरन् प्रययां
तमिदं तयो जीवेश्वरयोः रणितं व्याख्यानं तच्छलात् तथा
च तत्वमस्यादिवाक्येन जीवब्रंह्मणोरैक्य व्याख्यानच्छलात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जहदजहल्लक्षणयानिर्विकल्पकरूपं ब्रंह्मज्ञानं माच क्षाणं द्वैता
द्वैतरूपंत्वच्चरणाद्वयं स्वप्नस्त्याधिकरणंसामेथ्यर्लाभार्थं त्विम्दत्का
न सजंतीतिउभयपक्षेप्यर्थः। भवानीपक्षे॥ भवनकुलहंसाश्री
च्चेक्रस्थादेवताः पंचाशत्संख्याकाः। तथाहि॥ प्रथमं गुरुश्चक्रे
श्वरः ततो गणपतिः सर्वद्वारनिविष्टः ततो नानावृक्षमहोत्ला
लना नेकाथ्यः चतुर्द्वारपालको दीपनाथः कल्पतरुवाटिकायां वसं
तः संतानवाटिकायां ग्रीष्मनाथः हरिचंदनवाटिकायां वर्षा
नाथः मंदारवाटिकायां शरदृतुनाथः पारिजातवाटिकायां
हिमर्तुनाथः कदंबवाटिकायां शिशिरर्तुनाथः तत्रैव रत्नया
मां वा पुष्परागवाटिकायां मसूजयनाथः पद्मरागवाटिकायां

अंबादेवी गोमेदवाटिकायांश्रीकालसंकर्षणी हीरतरुवाटिका
यांविश्वावसुगंधर्वपतिः वैडूर्यवाटिकायांअनंतनाथः हरित
मणिवाटिकायां वेदमाता गायत्री मुक्तामणिवाटिकायां पू
र्वभागे देवेंद्रनाथः तस्याद्क्षिणे भगवान् वैश्वानरः तस्याया
म्यायां यमनाथः तस्याद्क्षिणपश्चिमे निर्ऋतिनाथः तस्या ॥९१॥
॥९१॥ पश्चिमे वरुणनाथः तस्यावायव्ये मारुतनाथः तस्याः उत्तरे
कुबेरनाथः तस्याः प्रागुत्तरभागे रुद्रः देवतालवाटिकायांबा
त्तौली विद्रुमवाटिकायां ब्रह्मनाथः माणिक्यमंडपे श्रीमहा
विष्णुः सहस्रस्तंभमंडपे शंभुनाथः अमृतवाटिकायां तारा
देवी आनंदवाटिकायां वारुणीदेवी विमर्षणीवाटिकायांकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुकुल्लदेवी बालातपच्छायायां मार्त्तंडभैरवः चंद्रिकोद्गारकच्छा
यायां सोमनाथः शृंगारपरिखायां मन्मथनाथः महापद्मा
टव्यां अन्नपूर्णा चिंतामणिगृहराज प्राग्द्वारे दुर्गाभट्टारिका
तस्य दक्षिणद्वारे सरस्वतीभट्टारिका महामेचाधस्तात् श्री
बालांबिका चिंतामणिगृहराजपरितो महाशंभुनाथः चिंता
मणिगृहराजपूर्वद्वारे अम्लेतेश्वरी चिंतामणिगृहराजलि
ङ्गिका पीठे श्रीमदंबा चिंतामणिगृहराजपूर्वोत्तरमणिधि
ष्ण्ये मंत्रे चक्रमातंगी तस्यैव दक्षिणभागमणिधिष्ण्ये मंत्र
चक्रवाराही चक्रराजमहारथशृंगे सस्थाननाम भट्टारिका
श्रीचक्रस्थाने श्रीकामेश्वरभट्टारक इति ॥१०॥ श्लोकः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ददानेदीनेभ्यःश्रियमनिशमाशानुसदृशीममंदंसौंदर्यं
स्तबकमकरंदंविकिरति॥तवास्मिन्मंदारस्तबकसुभ
गेयातुचरणेनिमज्जन्मज्जीवःकरणचरणोषट्चरण
तां॥९१॥ददानइति॥दीनेभ्यःदरिद्रेभ्यःआशानुसदृशीं
वांछासदृशींश्रियंलक्ष्मींददानेप्रयच्छति।अमंदंभूयिष्टं
सौंदर्यस्तबकमकरंदंलावण्यसमूहमधुरसंविकिर
॥९३॥ तिमंदारस्यसुरतरुविशेषस्यस्तबकोगुच्छस्तद्वत्सु ॥९३॥
भगेशोभनेअस्मिन्तवचरणेनिमज्जन्निलीयान्
स्वादरसमनुभवन्मल्लक्षणजीवोजीवात्माकरणाचर
णेः मनःसहितश्रोत्रादिज्ञानेंद्रियात्मकैःचरणैःपादैःषट्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरणातांषट्पदलंयातुइत्यर्थः॥विष्णुपक्षेप्येवं॥११॥श्लोकः॥
अरालाकेशेषुप्रकृतिसरलामंदहसितेशिरीषाभाचित्तेद
षदिवकठोराकुचतटे॥भृशंतन्वीमध्येपृथुरपिवरारो
हविषयेजगत्त्रातुंशंभोर्जयतिकरुणाकाचिदरुणा॥१२॥
अरालेति॥केशेषुअरालावक्रामंदहसितेईषद्धासेप्र
कृत्यास्वभावेनसरलाऋज्वीगात्रेशरीरेशिरीषाभा
शिरीषाकुसुमवत्कोमलाकुचतटेस्तनाभोगेदृषदि
वशिलेवकठोराकठिनामध्येउदरेभृशंअतिशयेनतन्वी
कृशावरस्यश्रेष्ठस्यआरोहस्यनितंबस्यविषमेस्थानेपृथुः
प्रथिमगुणयुक्ताआरोहोजघनंश्रेणीनितंबस्त्रीकटीतटे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३॥ इति विश्वः ॥ १९ ॥ वंशस्ताः शंभोः महेशस्य करुणा भवानीरूपा अरुणा
आरक्तवर्णा काचिदनिर्वचनीया जगत्त्रिभुवनं त्रातुं रक्षितुं
जयती सर्वः ॥ विष्णुपक्षे ॥ शं कल्याणं भवत्यस्मादिति शंभुर्वि
ष्णुस्तस्य करुणा जयती कीदृशी अकरेषु कोमलाः ईशः शि
वः तद्विरुद्धेषु अराला वक्रा अमंदं स्वल्पं हसितमुपहासो य
स्मात्सोऽमंदहसितो नारदस्तस्मिन् प्रकृतिसरलास्व ॥१३॥
भावतो ऋज्वी अं विष्णुं गायंती यगावैदमवास्तान् आसं
मंतात् त्रायते रक्षत्य गात्रो वैदमवरक्षकः यद्धानगच्छति
न न भूयते यगो वेदस्तमासमंतात्त्रायते रक्षतीयगात्रो ब्रह्म
णस्तस्मिन् शिरीषवत्कोमला शिरीषाभा चित्तइति पाठे अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारप्रश्लेषः तेन अकारो विष्णुस्तद्विषयकं चित्तं यस्मिन्वै ष्णवइ
सर्थः। कामिन्याः कुचौ तटे निकटे यस्या सो कुचतटः कामी त
स्मिन्न् दृषद्विकठोरा वरं तपस्विनं आरोहंतीति वरारोहा देया
स्तस्मिन्न् भञ्जंतन्वी स्वल्पा इ मिध्ये लक्ष्म्या उपरि एथु र्बकुला का
चिति कश्चात्मनि समाख्यात इत्येकाक्षरकोशः। क आत्मा तद्विष
यकमचिदज्ञानं यस्य तस्मिन्देहात्मवादिनि अरुणा अनेनुकूले
सर्थः॥१२॥श्लोकः॥ पुराराते रंतः पुरमसित तस्त्वच्चरणयोः स
पर्यामिर्यादा तरल करुणा नामसुलभा॥ तथा ह्येते नीताः शत
मखमुखाः सिद्धिमतुलां तव द्वारोपांतस्थितिभिरणिमाद्याभि
रमराः॥१३॥ पुरारातेरिति॥ पुराराते शिवस्य त्वमंतःपुरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रधानंमहिषीअसिभवसिततोहेतोःतरलकरणानामजितेंद्रि
याणांतवचरणयोःअमर्यादासंपूर्णास्वपर्याप्तआज्ञास्वपर्यायाःप्रज्ञा
मर्यादानिष्ठेतिवाअसुलभादुःप्रापादुःसाध्येतियावत्॥तथापि
संपूर्णपरिज्ञायाअभावेपिअसंपूर्णपरिज्ञयैवएतेतरलकरणा
रंभादिपरिरंभणादिसंभावितहृदयाःशातमखमुखाःइंद्रा
दयअमरादेवाःतवद्वारोपांतस्थितिभिःत्वदीयचिंतामणिगृह ॥९४॥
॥९४॥ राजस्यांतिमकक्षाणिविशभिःअणिमाद्याभिःदशभिःसिद्धिभो
गैश्वर्यसंपदंअतुलामतिशायितांनीताःप्रापिताइत्यहोत्वत्सज्ञा
महात्म्यप्रकर्षइत्यर्थः॥विष्णुपक्षे॥हेअंतःपुरमंतःपुरेअंतःपु
ररूपावामालक्ष्मीर्यस्यसतथासिततइत्यत्रप्रथमायांतसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लतेनसिताश्वेतासात्विकीलक्ष्वरणयोःसपर्यामर्यादालरलकर
णानामिंद्रादीनांपुरनामकदैत्यभेदनभर्त्तुःशिवस्याप्यसुल
भायद्वापुराणांजागत्स्वप्नसुषुप्तिरूपाणामशतेनांराकस्य
लवद्वारोपांतस्थितिभिरित्यनेनान्वयः।अथवालक्ष्वरणयोःसि
लतःसत्वप्रधानाभोगैकलंपटानामिंद्रादीनांसपर्यामर्यादा
तरलकरणानांअरातेःप्रहरादस्यपुराअसुलभाप्रापोलभ्या
जाताःतथापिश्रातमखमुखाःअमराःअणिमाद्याभिःसिद्धिंनी
ताःसंपूर्णसिद्धिलाभाप्तिर्यद्यपिप्रहरादस्यतथापिइंद्रादीनांसा
त्विकेनराजसेनाराधनेनाणिमादिसिद्धिजातैवेत्यर्थः॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्लोक॥गतस्तेमंचत्वंद्रुहिणहरिरुद्रेश्वरभृतः॥शिवःस्वच्छछायाघटितकपटप्रच्छदपटः॥त्वदीयानांभासांप्रतिफलनलोभारुणतयाशरीरीशृंगारोरसइवदृशांदोग्धिकुतुकं॥९४॥गतस्ते
॥९५॥ मंचत्वमिति॥द्रुहिणोब्रह्मासृष्टिकर्त्ताहरिःविष्णुःस्थितिकर्त्तारुद्रःसंहारकर्त्ताईश्वरस्तिरोधानकृत्॥एतेश्चतुर्भिःपादरूपैःभृतोधारितःशिवोसदाशिवोनुग्रहकारकःतेतवमंचत्वंगतःकीदृशःस्वच्छछाययाशुभ्रछाययाकांत्याघटितःकपटेनछलेनप्रच्छदपटःआस्तरणपटरूपःसदाशिवस्यकाशि ॥९५॥
पुरूपत्वात्एतादृशोदृशांकुतुकंसुखंदोग्धिददातिकइव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वदीयानां त्वदंगसंभृतानां भासां आरक्तकांतीनां प्रतिफलनला
भेन संक्रांतिलाभेन अरूपालयापाटलवर्णया शरीरीकृतदे
हपरिग्रहः श्टंगारो रसइवेत्यर्थः॥ तदुक्तं रुद्रयामले॥ अंसो वि
ष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः॥ एते पंच महाप्रेता भूताधि
पतयो मताः॥ चत्वारो पंचचरणाः पंचमः प्रच्छदः पटः॥ सा चित्र
काशरूपेण शिवेनाभिन्नविग्रहाः॥ तत्रासीने समासीना नि
र्नेशानंदरूपिणीति॥ श्टंगाररसस्य श्यामत्वं संगीतशास्त्रे श्टं
गारः शुचिरुज्वल इत्यमरः॥ शुक्लत्वं क्रोशोये युक्तं तथाप्यनु
रागप्रधानरजोगुणमयत्वादरुणतया त्र वर्णनमित्यवगं
तव्यं॥ विष्णुपक्षे॥ त्रिशोगुणात्रयेरहितः शुद्ध आत्मा लवमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चत्वंक्रीडास्खलत्वंगतः आत्मारामत्वाम्द्रवतः स आत्मा कीद
शः दुरितिणाहरिरुद्रेश्वरम्भ्टतः हरिरिंद्रः एभिर्देवैः हृदये
ध्यानावेस्छायांम्टतोप्यतः पुनः कीदृशः स्वच्छछाययाना
दिवासनारहितयाछायया अथवा शिवोमहेशः तवमं
चत्वंगतः ध्यानेन त्वांहृदये ध्यात्वा लभ्यतामपन्नः बुध्वा
॥९६॥ अघटितोसंबद्धः कपटो मायालेशूपआवरकस्तोसछ
द्मपटोयस्पसतथाशुद्धस्यमायारहितत्वात् त्वदीयानां ई
श्वरसंबंधिनीनां भासां बुद्धीनां मायारूपां प्रतिफले ॥९६॥
नलाभात् अरुणितोजगत्कर्तृत्वात् घभिमानवान् अ
तएव शुद्धचैतन्यस्यमायासंपर्कादुत्प्रेक्षते शरीरी शृंगार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिअरुणोपिदशांकुतुकंदोग्धिरूपवानिवभवतीत्यर्थः॥शि
वःकीदृशःद्रुहिणहरिरुद्रेश्वरभूतःएतैरपिध्यातःपुनःकी
दृशःस्वच्छच्छायाघटितकपटप्रच्छदपटःश्वेतकांतिसंबद्धप्र
च्छदपटरूपःअतएवमंचवेनोक्तःत्वदीयानांभासांश्यामकां
तीनांप्रतिफलनलाभेनअरुणतयास्फूर्यतेयाप्रकाशाक
नयेतियावत्॥शारीरीशृंगारोरसइवेतिशृंगारस्यरश्या
ममूर्त्तित्वादितिभावः॥९५॥श्लोकः॥कलंकःकस्तूरीरजनि
करबिंबंजलमयंकलाभिःकर्पूरैर्मरकतकरंडंनिबिडि
तं॥पुनस्त्वद्भोगेनप्रतिफलमिदंरिक्तकुहरंविधिर्भूयो
भूयोनिबिडयतिनूनंतवकृते॥९५॥कलंकइति॥कलंको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लांछनं कस्तूरी रजनीकरबिंबं चंद्रमंडलं जलमध्ये जलस्वरूपं
अत एव मकरेत करंडं अतिगंभीरस्य जलस्य हरिद्वर्णेपि ल
ब्धैः कलाभिः षोडशसंख्याकैरेव कपरैः घनसारखंडैर्नि
बिडितं भरितं रश्मपक्षे त्वद्भोगेन तांबूलास्वादरूपेण प्रति
॥९८॥ दिनं प्रत्यहं रित्क कुहरं भ्रन्योभ्यंतरं विधिर्ब्रह्मा तांबूलकरंड
वाहको भूत्वा सेवमानः भूयो भूयः प्रतिभुक्तपक्षं कलांतर
कपरैः खंडैः नादायतवक्त्रे त्वदर्थं नूनं निश्चितं निबिडय ॥९८॥
ति पूरयतीत्युभयपक्षसाधारणार्थः वस्तुतस्तु कलंकः अं
कः चिन्हं बिंदुचक्ररूपं कलंकांकापवादयोरित्यमरसिंहः ॥
न देवकस्तूरीवासनया बिंदुचक्रवासनया वासितस्यैव

चक्रांतरस्य सर्वसिद्धिप्रदत्वात्॥ तदुक्तं योगिनीहृदये॥ शून्या
काराविसर्गांताबिंदुप्रस्पंदसंविदः॥ प्रकाशपरमार्थत्वात्
स्फुरत्तालहरीयुतात्॥ प्रसृतं विश्वलहरीस्थानं मातृत्रया
त्मकं॥ बैंदवं चक्रमेतस्य त्रिरूपं च पुनर्भवेत्॥ धर्माधर्मौ त
थोल्लासौ मातृमेयौ तथा प्रमा॥ नवयोन्यात्मकं चक्रं चिदानंदकरं
महदिति। पुनः कीदृशं जलमयं रजनिकरबिंबं अमृतमयं चं
द्रमंडलं रूपं मध्ये त्रिकोणे अमृतं परमामृतार्द्रमित्युक्तेः। अ
मृतबीजवरात्मकमिति वार्थः। रिक्तकुहरं रिक्तः शून्यो विस
र्गः कुहरे रंध्रे मध्ये यस्य तत् अतः अकारमारभ्य कलाभिः
बिंद्वंतस्वरैः तदधिष्ठातृकामेश्वर्यादितत्तत्तिथिरूपपंचद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रानित्याभिः कर्पूरैः चक्रांतरवासकैः निबिडितं वेष्टितं मरकतकरं
उमिति बिंदुचक्रं किमिदं इंदुचक्रं तद्योगेन त्वच्छरीरं मूलेन एकैक
नित्यास्मनां प्रतिदिनं प्रतितिथौ विधिर्विधिवाक्यं तव वक्तेत्वद ॥१९८॥
र्चनार्थं भूयो भूयो निबिडयति योजयति। अयं भावः पंचपंच
स्वरयुक्तत्रिकोणरेखात्रये प्रत्यहं कामेश्वर्यादिचित्रांतानां
नित्यानां मध्ये विसर्गसुंदर्याश्च एजनं पुनर्मध्ये अनुलोमवि
लोमक्रमेण शुक्लकृष्णपक्षयोः कामेश्वर्यादिचित्रांतानां चि ॥१९८॥
त्रादिकामेश्वर्यंतानां तत्तत्तिथौ वैकैकस्याः पूजनमित्युक्तं
मंत्रेति भवानीपक्षे स्वार्थः ॥१९५॥ श्लोकः ॥ स्वदेहोद्भूताभिर्घृ
णिभिरणिमाद्याभिरभितो निषेव्ये नित्ये त्वामहमिति सदा भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयतियः॥ किमाश्चर्यंतस्यत्रिनयनसमृद्धिं त्वणायतोमहासंवर्त्ता
ग्निर्विरिचयतिनीराजनविधिं॥१६॥ स्वदेहइति॥ हेनिषेस्वदेहो
द्भूताभिःस्वच्छरीरोत्थिताभिःकिरणारूपाभिरणिमाद्याभिः
संवरणादेवताभिरभितोनिषेव्यांसेव्यमानांत्वांअहमितिअ
भेदनयोभावयति॥ निषेव्यामित्यत्रनिषेव्येइतिक्वचित्पाठः॥
तत्रहेअणिमादिभिर्निषेव्येसेवितइतिसंबोधनं त्रिनयनस्य
शिवस्यसमृद्धिमैश्वर्यंत्वणायतस्तृणवन्मन्यमानस्यमहासं
वर्त्ताग्निःप्रलयकालाग्निःनिराजनविधिंविरचयतीतिकिं
माश्चर्यमितिस्यर्थः॥ तदुक्तंकामिकामते॥ त्वद्देहोत्थिततेजोभिः
किरणैरणिमादिभिः॥ आवृतांत्वामहमितिभावयेत्स्वसमोभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदिति। दत्तात्रेयोप्याह॥ अरुणांकरुणातरंगिताक्षींधृतपाशां
कुशपुष्पबाणचापां॥ अणिमादिभिरावृतां मयूखैरहमि
त्येवविभावयेभवानीति। विष्णुपक्षे॥ हेनिषेव्यसेवनयोग्य
ओमितिसंबोधने स्वदेहः परमेश्वरस्यदेहोवेदस्तस्मादु
द्भूताभिर्दीप्तिभिः तेजोरूपाभिः अणिमाद्याभिः अणिमा
॥११॥ दिसंज्ञकरूपाभिर्गोचिभिःसहत्वांअहमित्यभेदेनयःस
दाभावयतिनित्येनित्यरूपंयद्ब्रह्मतन्निमित्तंजननस्य ॥११॥
त्रिवस्यभिक्षुकत्वात्तत्सम्यद्धिंभिक्षारूपात्रणायतस्तु
च्छीकुर्वतस्तंसंवर्त्ताग्निरूपिनीराजनविधिंविरचयति॥
तस्यभिक्षाप्राप्त्याजठरानलज्वालाजन्यदुःखापशमनंस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल्पफलंप्रलयकालिनज्वालानलोपिनदुःखमुपजनयतीतिभावः॥
तदुक्तंक्रमदीपिकायां॥द्विजोभिक्षावृत्तिर्यदिहदिनन्शोनंदतनयः
स्वयंभूत्वाभिक्षामटतिविरहक्रोपप्रसुदत्तां॥अमाचेतोभिःस्वे
लीलिललिलितेनर्मविधिभिर्दधिक्षीराज्याभ्यांप्रचुरतरभिक्षां
सलभइति॥१६॥श्लोकः॥समुद्भूतस्थूलस्तनभरमुरश्चारुह
सितंकटाक्षेवक्रंदर्पःकतिचनकदंबद्युतिवपुः॥हरस्यत्वद्भ्रांति
र्जननिजनयंतःसमतुलांभवत्यांयेभक्ताःपरिणतिरमीषामि
यमुमे॥१७॥समुद्भूतेति॥हेउमेयेविमलाःपुरुषाभवत्यांभक्ताः
अमीषांउरःवक्षस्थलंसमुद्भूतस्थूलस्तनभरंसमुद्भूतः
उत्तुंगयोद्गतःस्थूलःपरिणाहवान्स्तनभरोयत्रतत्हसितंस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंचारुमनोहरंकटाक्षेअपांगप्रदेशेकृतिचनकृतिपयेकंदर्पःका
माःवपुःशरीरंकुसुमितकदंबद्युतिप्रफुल्लकदंबाकारंरोमांच
युक्तमित्यर्थः।इयंपरिणतिःपरिणामःत्वद्भक्तास्वरूपाभवंती
तिभावः।अतोहरस्यशिवस्यमनसिचित्तेमदनेःकंदर्पःत्वद्भ्रां
तित्वद्भ्रमंजनयामासस्मरहरोपित्वद्भक्तास्वदाकारान्दृष्ट्वा
॥१००॥ विषमशरविह्वलांगोभवतीतिभावः।विष्णुपक्षे॥भवतित्व ॥१००॥
यिआंस्मरणेभवतिकीदृशोउमेउत्तरंएष्टशामाप्रमातत्वज्ञानस
पायस्मात्तस्मिन्उत्वंएषप्रमाजनस्यापिशिवमनसिभ्रमज
नकत्वेनविरोधालंकारःअमीषांभक्तानांउरोवक्षःस्थूलंस्थू
लस्तनस्यभरोभारोयस्यासौस्थूलस्तनभारःकौस्तुभः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुद्भूतंव्यक्तंस्थूलस्तनभरंकौस्तुभंयत्रतत् समुद्भूतस्थूलस्त
नभरंयद्वासमुद्भूतःस्थूलोतिशयितस्तनःशब्दःख्यातिरूपोय
स्यासौसमुद्भूतस्थूलस्तनःश्रीवत्सांकःतंबिभ्रतीतिसमुद्भूत
स्थूलस्तनभरमित्यर्थः॥शेषंसमानं॥१७॥श्लोकः॥कलत्रंवै
धात्रंकतिकतिभजंतेनकवयःश्रियोदेव्याःकोवानभवतिपतिः
केरपिधनैः॥महादेवंहित्वातवसतिसतीनामचरमेकुचाभ्या
मासंगःकुरबकतरोरप्यसुलभः॥१८॥कलत्रमिति॥हेसति
दक्षदुहितेनकेवलंनाम्नात्वंसतीअपितुसतीनामचरमेप
तिव्रतानांप्रधानभूतेवैधात्रंविधातृसंबंधंकलत्रंसरस्व
तींकतिकतिकवयोनभजंतेनकलत्रीकुर्वंतीयत्किंचित्कवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनैव सरस्वतीवल्लभत्वं प्राप्नुवंति॥ श्रियो देव्या लक्ष्मीदेव्याः
पतिकैरपि किंचिन्मात्रैरपि धनैः को वा न भवति। तत्र कुचा
भ्यां पयोधराभ्यां आसंतः परिषंगः महादेवं हित्वात्रिवं विह
य कुरवकतरोरपि उत्तमांग नालिंगने दोहद दिनोरक्षाविच्छे
॥१०१॥ बस्यापि असुलभो दुर्लभ इत्यर्थः। विष्णुपक्षे॥ कलत्र इत्या ॥१०१॥
दिना सरस्वत्याः पुमंतरसंबंधमुक्ता लक्ष्म्यास्तदभावमा
ह॥ श्रियइति॥ श्रियो देव्याः पतिकैरपि धनैरेव ननु वक्ष्यमा
णालिंगनादि महादेवं श्रेष्ठदेवं हि निश्चितं त्वा त्वां आलक्ष्मीर
य हे अतस्स्वर्गवसतिसतीनां वसतो गृहे सनीनां विधमा
नो नां मध्ये अचरमाई लक्ष्मीस्तस्याः कुचाभ्यां मासंगः कु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रवकतरोरप्यसुलभः तथाचत्वत्समो नान्य इति भावः॥ अथवा वै
धात्रं कलत्रं सरस्वतीकृतिकवयो न भजंते तस्याः को वा ब्रह्मा वा
पतिर्नभवति। अपितु भवत्येव तथाच सरस्वत्या अपि पति द्व
यं श्रियो लक्ष्म्याः केरपि धनैः कोस्तु भोगादिभिः सह कुचाभ्याम
संगः महादेवमपिहित्वा तवैव नापरस्य कीदृशः कुरवकतरोर
प्यसुलभः। ननु लक्ष्म्या स्वदतिरिक्ते नुरागो नास्तीयत्र किंचि
त्रमत आह॥ देव्याः दिवुक्रीडाविजिगीषाव्यवहारद्युतिस्तुति
कांतिगतिषिति धात्वनुसारात् कांतिशालायाः क्रीडा व[illegible]ः व
गतिशालिन्याश्चंचलया वाचरमे सति चरमेव यसि वार्द्धु
के सति सतीति संज्ञा भवतीत्यर्थः। तथाच क्रीडाशालिन्यो
लक्ष्म्या अपि स्थैर्यं त्वय्येव तिष्ठत्स्वभावो लक्ष्द्या शयः॥१९॥

श्लोक॥ गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो हरेः पत्नीं
पद्मां हरसहचरीमद्रितनयां॥ तुरीया कापि त्वं दुरधिगमनिः
सीममहिमा महामाये विश्वं भ्रमयसि परब्रह्ममहिषी॥९८॥
गिरामाहुरिति॥ हे परब्रह्ममहिषी महेश्वरापत्नि महामाये अ
विद्याविद्यारूपे द्रुहिणो ब्रह्मा तस्य गृहणीं पत्नीं गिरा देवी सर
स्वतीं त्वां आगमविदो वेदविद आहुः॥ हरेर्विष्णोः पत्नीं स्त्रियं
पद्मां लक्ष्मी आहुः हरसहचरीं शिवसधर्म्मिणीं अद्रेर्हिमा
लयस्य तनयां पुत्री माहुः। स्वमतमाह॥ त्वं काप्यनिर्वचनी
या तुरीया सरस्वत्या॥ याद्रित्रयातिरिक्ता दुरधिगमो
दुर्विज्ञेयः निःसीमोऽपर्यंतः महिमा प्रभावो यस्याः सा दु
रधिगमनिःसीममहिमा विश्वं प्राणिजातं भ्रमयसि स्वकी

॥१०२॥ ॥१०२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यनानारूपदर्शनेनसरस्वत्यादि।बुद्धिमंतंकरोषीत्यर्थः।अथ
वागीशांदेवीमैंकाररूपांपंचदशींवाग्भवकूटरूपांवाआगम
विदस्तांत्रिकाः हरेःपत्नींश्रीबीजरूपांपंचदशींकामकूटरू
पांवाअद्रितनयांलज्जाबीजरूपांपंचदशींतृतीयकूटरूपांवा
पंचदशींकूटत्रयस्यब्रह्मविष्णुरुद्राधिष्ठितत्वात्तुरीयाईं
काररूपांतुर्यातीतंसमाययेतितंत्रराजोक्तत्रयोदशाक्षरतुरी
यकूटरूपांवेत्यर्थः।विष्णुपक्षे।हेमाहामायेमहामायाईलक्ष्मी
र्यस्येत्यर्थात् एङ्ह्रस्वादि सुलोपः॥त्वांसरस्वतींलक्ष्मींभवानीं
चागमविदोवदंति।स्त्रीरूपापित्वमेवेत्यर्थः।वस्तुगत्याकापिदु
रधिगमनिःसीममहिमातुरीयोजाग्रत्स्वप्नसुषुप्त्येवस्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिरस्कारवस्थात्वं विश्वं जगत् भ्रमयसि नानारूपत्वेन दर्शयसि॥
कीदृशं जगत् परब्रह्मैव महिषीवाहनं आधारउपादानकार
णायस्य तत् परब्रह्म महिषीमहिषवाहनत्वेन संसारोपवर्ण
नात्॥ तस्य यमस्य दत्ताभयदायकत्वं सूच्यते॥९९॥ श्लोकः॥
।१०३। सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते रतेः पातिव्रत्यं शि
थिलयति रम्येण वपुषा॥ चिरंजीवन्नेव क्षपितपशुपाश ॥१०३॥
व्यतिकरः परब्रह्माभिख्यं रमयति रसं त्वद्भजनवान्॥१००॥
सरस्वत्येति॥ त्वद्भजनवान् त्वद्भक्तः सरस्वत्यादिगद्यपद्यादि
रूपया विद्यया लक्ष्म्या धनसमृद्ध्या विहरते क्रीडति॥ विधेः
ब्रह्मणः हरेः विष्णोः सपत्नः समानपत्नीकः सन् रम्येण शोभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेन पशुपाशशरीरेण रतेः कामपत्न्याः पातिव्रत्यं शिथिलयति दूरीकरोति। चिरजीवन्नेव ब्रह्मा घनुलं घनीयं काल मुलं घ्य वर्त्तमान एव क्षपितो दूरीकृतः पशुपाशानां पुत्रकलत्रादीनां व्यतिकरः संबंधो येन स तथा यद्वा क्षपितः पशूनां पाशाः घृणाशंकादयः तेषां व्यतिकरो येन तथा भूतः सन् परब्रह्माभिख्यं परब्रह्मनामकं रसं रसो वै सः इति श्रुतेः रसयति आस्वादयती सथर्थः॥ तदुक्तं कुलचूडामणौ॥ घृणाशंकाभयं लज्जा जुगुप्सा चैव पंचमी॥ कुलं जातिश्च शीलं च अष्टौ पाशाः प्रकीर्त्तिताः॥ एतैः पाशैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्विरहितोनिर्विकारोजितेंद्रियः॥विश्वव्याप्तिमहात्तान
क्रमेणपुरुषोश्रुतं इति।विद्यमुपक्षे॥हरिरिंद्रः श्रोषंस
मानं॥१००॥श्लोकः॥निधेनियस्मेरेनिरवाधिगुणे
नीतिनिपुणोनिराघातज्ञानेनियमपरचित्तैकनि ५१०४॥
॥१०४॥ लये॥नियत्यानिर्मुक्तेनिखिलनिगमांतःस्तुतिप
दिनिरातंकेनित्येनिगमयममापिस्तुतिमिमां॥१०१॥
निधेइति॥निधीयतेजगदस्यामितिनिधिः।तेनजगदा
धारभूतेत्यर्थः।नियस्मेरेनियंस्मितोल्लसद्वदनेजी
वानांमिथ्याभूतजगदावेशानिरीक्षणस्मितकारणंननु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगद्धारताच्छरीरस्य स्थितयोगश्च शरीरिण इति परस्प
रविरुद्धं कथमेकत्र लभ्यत इत्यत आह। निरवधिगुणो भक्तानु
ग्रहाय नानारूपगुणाविष्कारेण सर्वमुपपद्यते तवेति भा
वः। ननु यदि भक्तानुग्रहाय शरीरादिपरिग्रहस्तत्कथं कश्चि
द्राजा कश्चित्तपस्वीत्यादिभक्तेषु तारतम्यमित्यत आह॥ नी
तिनिपुणो। भक्त्यनुकूलफलदानदक्षो। तर्हि कर्मपरतंत्राह
मित्यत आह। निराघाते ज्ञाने। निराघातमप्रतिहतमन्यानधी
नं ज्ञानमनुग्रहो यस्य ननु स्वातंत्र्येपि कश्चित्स्वल्पफलदातृ
त्वं कश्चिद्बहुफलदातृत्वं तवेति कथं वैषम्यमत आह। निय
मपरचित्तैकनिलये ध्यानएजादिनियमपरचित्तमात्रास्थि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते। तर्हि नियमपारतंत्र्यमेवावगतमत्र आह। नियत्या निर्मुक्ते नि
यमादिजन्यादृष्टानपक्षेए तादृशीमप्यां किं प्रमाणमत आह।
निखिलनिगमांतस्तुतिपदे निखिलनिगमांताः सकलवेदां
ताः उपनिषद्भागा एव स्तुतिपदानि स्तुतिस्थानानि यस्याः स
कलवेदांतमते स्वमेव प्रतिपाद्यसे तेन उपनिषद्भागा एव त्व
१०५ यि प्रमाणमिति भावः। स्तुतपदे इति पाठे वेदांतैः स्तुतिपदं च १०५
रणो यस्या इत्यर्थः। केन प्रकारेण स्तुतपदे स्यत आह। निरातं
के निर्गतः आतंकः बंधजनिता भीतिर्यस्याः नित्ये कालत्रयाबा
ध्ये ममापि इमां स्तुतिं निगमयतत्करोतीत्यर्थे लोट्। वेदमि
व सर्वसर्वसंप्रतिपन्नां कुर्वित्यर्थः। विष्णुपक्षे। हे निधे भक्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णां निधिरूपअन्यानिपदानिसमस्तानितेननित्यस्मेरत्वादिगुणयु
क्तेत्वयिविषयेइमांममस्तुतिंनिगमयवेदवदादरणीयांकुर्विद
र्थः॥१०१॥श्लोकः॥प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चंद्रोपलजललवैरर्घ्यघटना॥स्वकीयैरंभोभिःस
लिलनिधिसौहित्यकरणंत्वदीयाभिर्वाग्भिस्तवजननिवाचांस्तु
तिरियं॥१०२॥ममस्तुतिमिषेनेनप्राप्तंस्वकर्तृत्वंस्तुतेरपाकरो
ति॥प्रदीपज्वालाभिरिति॥हेवाचांजननिमातृकारूपेत्वदीयाभि
रेववाग्भिस्तवस्तुतिरियंनमद्वाराभिरियथः॥यथाप्रदीपज्वा
लाभिर्दिवसकरस्यसूर्यस्यनीराजनविधिरारात्तिकंविधानं
नहिसकलभुवनांतवर्त्तिध्वांतध्वंसकस्यभगवतोमार्त्तंडस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रदीपज्वालाभिः प्रकाशइत्यर्थः। सुधासूतेश्चंद्रस्य चंद्रोपलजल
लवैश्चंद्रकांतपानीयाविप्रुषैरर्घ्यघटना अर्घ्यदानं स्वकीयेनि
जैरंभोभिर्जलैः सलिल निधेः समुद्रस्य सोहि सकरणं तृप्ति
संपादनं सोहियं तर्पणं तृप्तिरित्यमरः। अत्र यथोक्तशब्दाभावे
पि प्रदीपेत्यादिना दृष्टांतेतानिदर्शनालंकाररीत्यातिलीर्षुर्दुस्त
रंमोहादुडुपेनास्मि सागरं॥ विष्णुपक्षे॥ जननमस्यास्तीतिज 1०६
ननिर्जीवः जननिनांजीवानां वाक्‌वचनं तासां जननवाच्यांम
ध्ये इयं स्तुतिस्त्वदीयाभिरेव वाग्भिः अंतर्यामितया त्वयैव नि
र्मिताम न्मुखानिः सरणमात्रमेतस्या इत्यर्थः॥ जननीतिएव
वह्निष्णु संबोधनं वा॥१०२॥ अर्थंमदीयमवलोक्यततोपिःस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ ग्रथांतरं समधिगम्यनिनिंद्यमेतत्॥ असंतदुर्गमतरे
पथि संचरंतः श्लाघ्या भवंति कवयः पुरतः प्रयाताः॥१॥ भे
दन तेज हि निनिता तु जनार्दनेन वैकुंठनाथ परतापि हृता त्रलेन॥
मात भवापि करवाणि तथापि का कुंमाकुंठितोस्तु मयि ते क
रुणाकटाक्षः॥२॥ इति श्री नरसिंहविरचिता आनंदलहरी
टीका समाप्ता॥ छ॥ शुभमस्तु॥ शके १६५९ वर्षे आनंदनाम
संवत्सरे माघशुद्ध पंचमी ५ गुरुवासरे तद्दिने समाप्तमिति॥
हस्ताक्षर रवगाभट लांबोपनाम्नातेन परोपकारार्थं लिखि
ते॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥ यदि शुद्धमशु
द्धं वा मम दोषो न विद्यते॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८७॥ ॥ हे पोथि सुंदरलहरीचीटीका समाप्त ॥ शुभमस्तु ॥१०७॥

नृसिंहगिरारचित आनंदलहरी टीका ।

॥ हे पुस्तक सुंदरलहरी चिटीका ॥ श्रीभगवान्त्यर्पणमस्तु ॥

[OrderDescription]
,CREATED=17.02.20 10:29
,TRANSFERRED=2020/02/17 at 10:55:05
,PAGES=215
,TYPE=STD
,NAME=S0002829
,Book Name=M-2674-ANAND LAHARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection